तच्छब्देन ज्येष्ठ उच्यते। तदानीं तस्यैव स्वातन्त्र्यात्॥ कार्यज्ञपदेनानन्तरपदस्यानुजोपलक्षणपरत्वं सूच्यते।

Digitized by Google

अशक्तग्रहणं च दीनादेरप्युपलक्षणार्थमिति चंद्रिकाकारः ॥

[56.] अनेनाशक्तग्रहणेन वार्धकादिना पितर्यस्वतन्त्रतामापन्ने तदनिच्छया पितृधनविभागः पुत्राणामिच्छयैव भवतीति ज्ञायते ॥

[57.] तथा च नारदः । व्याधितः कुपितश्चैव विषयासक्तमानसः । अन्यथा शास्त्रकारी च न विभागे पिता प्रभुरिति ॥

अपि तु पुत्रा एव प्रभव इति शेषः ॥

[58.] अत एवाह स एव । पितैव वा स्वयं पुत्रां विभजेद्वयसि स्थित इति ॥

वयसि स्थितः अप्रतिहतस्वातन्त्र्ययुक्तः ॥

[59.] पितैव वेत्येवकारवाशब्दाभ्यां व्याधितत्वादिदोषराहित्ये पितुरेव विभागकरणे ऽधिकारः । अन्यथा पुत्राणामित्यर्थः ॥

[60.] अत ऊर्ध्वं पितुः पुत्रा विभजेरन्धनं समं । मातुर्निवृत्ते रजसि प्रत्तासु भगिनीषु च ॥ निवृत्ते चापि रमणे पितर्युपरतस्पृहे ।

रमणविषये रन्तुमित्यर्थः ॥

[61.] उपरतस्पृह इत्यनेन मातुर्निवृत्ते रजसीत्य-

Digitized by Google

नेन च पितुः पत्न्यन्तरस्वीकारेच्छायां विभागो नास्तीति गम्यते ॥

[62.] अतश्च ऊर्ध्वं पितुरित्यनेन एको विभागकालः। स चाजीवद्विभागः॥ मातुर्निवृत्ते रजसीत्यनेन जीवद्विभागकालः॥ एवं विभागस्य कालद्वयमुक्तं ॥

[63.] पितुरिच्छायास्तु जीवद्विभागानतिरेकान्न पृथक्कालभेदः॥ विभागकालमाहतुः शंखलिखितौ। भ्रातॄणां जीवतोः पित्रोस्सहभावो विधीयते। तदूर्ध्वमपि तेषां च वृद्ध्यर्थं च सहस्थितिरिति॥ कामं वसेयुरेकत्र संहताः वृद्धिमापद्येरन्निति॥

पृथक्पृथग्व्ययाभावादिति भावः॥

[64.] विभागे तु धर्मो वृद्धिमापद्यत इति॥ तथा च गौतमः। विभागे धर्मवृद्धिरिति॥

[65.] सा कथमित्यपेक्षिते। नारदः। भ्रातॄणामविभक्तानां एको धर्मः प्रवर्तते। विभागे सति धर्मोऽपि भवेत्तेषां पृथक्पृथगिति॥

[66.] धर्मः पितृदेवतार्चनादिजन्यः॥ तथा च बृहस्पतिः। एकपाकेन वसतां पितृदेवद्विजार्चनं। एकं भवेद्विभक्तानां तदेव स्याद्गृहे गृहे॥

[67.] अतश्चाविभक्तानामपि स्वसाध्याग्निहो-

Digitized by Google

त्रादिजन्यो धर्मस्संपद्यत एव। किन्तु विभागे सति धर्मवृद्धिर्गौतमादिमतद्वयेनोक्तेत्यनुसन्धेयं॥

[68.] अत्र समविभागपक्षस्य सार्वत्रिकत्वेनाभिधानात्। यस्मिं विषये यदि पिता स्वकीयेच्छया समविभागपक्षमंगीकुर्यात्तदा पत्न्यः पुत्रवत्यः समांशभाजः कार्य इत्याह याज्ञवल्क्यः। यदि कुर्यात्समानंशान् पत्न्यः कार्यस्समांशिकाः॥

[69.] यदि वार्धकेऽप्यात्मना सह समभागपक्षमिच्छया स्वपिता कुर्यात्तदा त्वात्मभागेन सह तत्समानभागं प्रतिपत्नीगृह्णीयादिति॥ अनेन जायापत्योर्न विभागो विद्यत इति आपस्तंबवचनं यत्र सहत्वचोदना तत्रैवेति मन्तव्यमिति भारुचिराह॥

[70.] अत एवाह याज्ञवल्क्यः। भ्रातॄणामथ दंपत्योः पितुः पुत्रस्य चैव हि। प्रातिभाव्यमृणं साक्ष्यमविभक्तेन तु स्मृतमिति॥

[71.] अत्राह विज्ञानयोगी। ननु दंपत्योर्विभागात्प्राक्प्रातिभाव्यादिप्रतिषेधो न विद्यते। तयोर्विभागाभावेन विशेषणानर्थक्यात्॥ विभागाभावस्त्वापस्तंबेन दर्शितः। जायापत्योर्न विभागो विद्यत इति॥ सत्यं॥ श्रौतस्मार्ताग्निसाध्येषु कर्मसु तत्फलेषु विभागाभावो न पुनस्सर्वकर्मसु द्रव्येषु वा॥ तथा

Digitized by Google

हि । जायापत्योर्न विभागो विद्यत इत्युक्ता किमिति न विद्यत इत्यपेक्षायां हेतुमुक्तवान् । पाणिग्रहणाद्धि सहत्वं कर्मसु तथा पुण्यफलेषु चेति ॥

[72.] अस्यार्थः । हि यस्मात्पाणिग्रहणादारभ्य कर्मसु सहत्वं श्रूयते जायापत्यग्निमादधीयातामिति। तस्मादाधाने सहाधिकारादाधानसिद्धाग्निसाध्येषु कर्मसु सहाधिकारः ॥ तथा कर्मस्मार्तं विवाहाग्नावित्यादि स्मरणाद्विवाहसिद्धाग्निसाध्येष्वपि कर्मसु सहाधिकार एव ॥ ततश्चोभयविधाग्निनिरपेक्षेषु कर्मसु पूर्तेषु जायापत्योः पृथगेवाधिकारस्संपद्यते ॥ तथा पुण्यादीनां फलेषु स्वर्गादिषु जायापत्योस्सहत्वं श्रूयते । दिविज्योतिरजतमारभेतामित्यादि ॥

[73.] येषु पुण्यकर्मसु सहाधिकारस्तेषां फलेषु सहत्वमिति बोद्धव्यं। न पुनः पूर्तानां भर्त्रैवननुज्ञयानुष्ठितानां फलेष्वपि ॥

[74.] ननु द्रव्यस्वामित्वे ऽपि सहत्वमुक्तं द्रव्यपरिग्रहेषु च । न हि भर्तुर्विप्रवासे नैमित्तिके दाने स्तेयमुपदिशन्तीति ॥

[75.] सत्यं ॥ द्रव्यस्वामित्वं दर्शितमनेन न पुन-

विभागाभावः । यस्माद्द्रव्यपरिग्रहेषु चेत्युक्ता तत्र कारणमुक्तं भर्तुर्विप्रवासे नैमित्तिके ऽवश्य कर्तव्ये ऽतिथिभोजनभिक्षाप्रदानादौ हि यस्मात्तत्तेयमुपदिशन्ति मन्वादयः ॥ तस्माद्भार्याया अपि द्रव्यस्वामित्वमस्ति । अन्यथा स्तेयं स्यादिति ॥

[76.] तस्माद्भार्याया अपि भर्तुरिच्छया द्रव्यविभागो भवत्येव । न स्वेच्छयेति ॥

[77.] अपरार्कमतं तु स्त्रीणां दायविभागो नास्त्येव । तस्मात्स्त्रियो निरिन्द्रियादिरिति श्रुतेः ॥ अतश्च पत्युरिच्छानुसारेण पत्नीनामपि धनं दातव्यं॥ समशब्दस्तु पत्युर्भागान्न्यूनं न कार्यं सममंशमधिकांशं वा दातव्यं । यदि कुर्यादिति यदि शब्देनेच्छानुसारप्रतिपादनादैच्छिकत्वादंशदानस्येत्यवगन्तव्यमिति ॥

[78.] अत्रेदं तत्त्वं । भारुचिमते पत्नीनां बहुत्वसद्भावे तासामेव विभागः ॥ विज्ञानयोगिप्रभृतीनां मते पत्न्येकनियतो विभागो नास्ति । किन्तु पुत्रैस्समविभागः पत्नीनां ॥ अपरार्कादीनां तु मते पत्नीविभागः पुत्रैस्समविभागश्च नास्ति किन्तु पतीच्छयादेयमिति ॥

[79.] अत्र पक्षत्रये वर्णतो व्यवस्थामाहुर्भाष-

Digitized by Google

काराः। ब्राह्मणानां पत्नीनां स्वपुत्रैस्समविभागः॥ क्षत्त्रियाणां तु पत्नीविभागो नास्ति न पुत्रसमविभागः। किन्तु पतीच्छया यत्किञ्चिद्देयमिति॥ वैश्यशूद्रयोः पत्नीविभागः॥ एतद्व्यवस्थायामाचार एव मूलमित्याहुः॥

[जीवद्विभागः]

[80.] अथाहतुश्शंखलिखितौ। जीवति पितरि रिक्थविभागोऽनुमतः प्रकाशं वा मिथो वा धर्मत इति॥ यो जीवद्विभागपक्षोऽनुमतः। स तावत्प्रकाशं बन्ध्वादिजनसमक्षं यथा भवति तथा मिथो वा रहसि वा धर्मतो धर्मप्रकारेण कार्य इत्यर्थः॥

[81.] तमेव प्रकारमाह कात्यायनः। सकलं द्रव्यजातं यद्भागैर्गृह्णन्ति तत्समैः। पितरौ भ्रातरश्चैव विभागो धर्म्य उच्यते॥

धर्म्यो धर्मादनपेतः॥

[82.] मनुः पुत्रेभ्यो दायं व्यभजदित्यविशेषेण समविभागश्रुतेः॥ विषमविभागश्च शास्त्रदृष्टोऽपि लोकविरोधाच्छ्रुत्यन्तरविरोधाच्च नानुष्ठेय इति समैर्भागैर्मध्यकद्रव्यं गृह्णन्तीति नियम्यते॥



Digitized by Google

[83.] अतश्चास्मिं कलियुगे ऽननुष्ठेयत्वाज्ज्येष्ठाद्युद्धारपक्षा न प्रतिपादिताः ॥

[84.] तथा हि। अस्वर्ग्यं लोकविद्विष्टं धर्ममप्याचरेन्न त्विति निषेधात् ॥ यथा महोक्षं वा महाजं वा श्रोत्रियायोपकल्पयेदिति विधाने ऽपि लोकविद्विष्टत्वादननुष्ठेयः। तथा वरुणांगारिवशामनूबन्ध्यामालभेतेति गवालंभविधाने ऽपि लोकविद्विष्टत्वादननुष्ठानं ॥ उक्तं च। यथा नियोगधर्मो ऽपि नानुबन्ध्यावधूपिवा। तथोद्धारविभागो ऽपि नैव संप्रति वर्तत इति ॥

संप्रति कलियुगे॥

[85.] तथापस्तंबो ऽपि । जीवन् पुत्रेभ्यो दायं विभजेत्सममिति ॥

[86.] सममिति स्वयमुक्त्वा ज्येष्ठो दायाद इत्येक इति कृत्स्नधनग्रहणं ज्येष्ठस्यैकीयमतेनोपन्यस्य देशविशेषे सुवर्णं कृष्णागावः कृष्णं भौमं ज्येष्ठस्य रथः पितुः परिभाण्डं च गृहे ऽलंकारो भार्याया ज्ञातिधनं चेत्येकीयमतेनैवोद्धारविभागं दर्शयित्वा तच्छास्त्रैर्विप्रतिषिद्धमिति निराकृतवान् ॥

[87.] अतश्च ज्येष्ठं वा श्रेष्ठभागेनेत्यत्रापरार्कादिव्याख्यातृव्याख्यानस्वाल्लित्यं नोद्घाटितं ॥

Digitized by Google

[88.] अथ जीवद्विभागे ऐच्छिको विभागः ॥

[89.] तथाह नारदः । द्वावंशौ प्रतिपद्येत विभजन्नात्मनः पितेति ॥ एतच्चैकपुत्रविषयं ॥

[90.] तथाहतुश्शंखलिखितौ । स यद्येकपुत्रस्याद्वौभागावात्मनो गृह्णीयादिति ॥ स इति प्रकृतः पिता परामृश्यते । एकपुत्रस्यादिति गलितवयस्कः अतिक्रान्तपुत्रान्तरलाभकालः ॥

[91.] एतच्च धनविभाग एव । न धर्मविभागे धर्मविभागेऽंश द्वयस्य प्रयोजनाभावात् ॥

[92.] यत्र पुत्रस्य पितृधने धनार्जनसमर्थतया स्वांशं गृहीतुं नेच्छा तत्र यावत्स्वीकरोति तावत्तस्मै दत्वा पित्रा पृथक्क्रियाकार्येत्याह याज्ञवल्क्यः । शक्तस्यानीहमानस्य किंचिद्दत्वा पृथक्क्रियेति ॥

[93.] यदा पुनर्जीवति पितरि पुत्रकर्तृको विभागः क्रियते । तदाऽपि सकलं द्रव्यजातमित्यादि कात्यायनवचने नोक्तसमविभागप्रकारेणैव कार्यः । पुत्रकर्तृके जीवद्विभागे प्रकारान्तरप्रतिपादकशास्त्रान्तराभावात् ॥

## [अजीवद्विभागः]

[94.] तथैवाजीवद्विभागे पैतृके विभज्यमाने दा-

याद्ये भ्रातृणां समो विभाग इति पैठीनसिस्मरणात्। समानो मृते रिक्थविभाग इति हारीतस्मरणाच्च॥

[95.] मृते पितरि भ्रातृभिः क्रियमाणो रिक्थविभागस्समभागेनैव कार्य इत्यर्थः॥ भ्रातृणामिति समस्वाम्यानां सवर्णानामेव॥ क्लीबादीनां सवर्णानां भागनिरासस्यासवर्णानां च तारतम्येन भागप्राप्तेश्च वक्ष्यमाणत्वात्॥

[96.] यथा पुत्रा रिक्थे समांशिनः तथा ऋणेऽपि समांशिन इत्याह याज्ञवल्क्यः। विभजेरं सुताः पित्रोरूर्ध्वं रिक्थमृणं सममिति॥

अत्र ऋणं पैतृकमेव विवक्षितं। अपैतृकस्य सहैवापाकरणीयत्वनियमात्॥

[97.] अत एवाह कात्यायनः। भ्रात्रा पितृव्यमातृभ्यां कुटुंबार्थमृणं कृतं। विभागकाले देयं तद्रिक्थिभिस्सर्वमेव त्विति॥

[98.] अत्र विशेषमाह कात्यायनः। धर्मार्थं प्रीतिदत्तं च यदृणं स्वनियोजितं। तद्दृश्यमानं विभजेन्न दानं पैतृकाद्धनादिति॥

[99.] यद्धर्मार्थं संकल्पितं यच्च पित्रा प्रीतेन दत्तं यच्च स्वेनैव पित्रा पुत्रैरपाकरणीयमिति नियोजितं

Digitized by Google

तदेव त्रिविधमृणं दृश्यमानं ज्ञायमानं विभजेदे-
वेत्यर्थः ॥

## [पत्नीविभागः]

[100.] ननु कथं। यदि कुर्यात्समानंशान् पत्न्यः कार्यास्समांशिका इत्यत्र स्त्रीणां दायानर्हत्वादंशशब्दो ऽन्यथा व्याकृतः ॥ कथं तर्हि याज्ञवल्क्येनोक्तं। पितुरूर्ध्वं विभजतां माता ऽप्यंशं समं हरेदिति ॥ कथं च व्यासेन। असुतास्तु पितुः पत्न्यः समानांशाः प्रकीर्तिताः। पितामह्यश्च सर्वास्ता मातृतुल्याः प्रकीर्तितेति ॥ कथं च विष्णुना। मातरः पुत्रभागानुसारिभागहारिण्यो ऽनूढाश्च दुहितर इति ॥

[101.] तर्हि स्त्रीणां दायानर्हत्वे मात्रादीनां दुहित्रन्तानामंशहारित्वोक्तिर्न युज्यते ॥

[102.] मैवं ॥ अत्रांशशब्दो न दायभागवचनः। अपि तु द्रव्यसमुदायप्रतीकमात्रवचनः ॥ अतश्च नोक्तदोष इति केचित् ॥

अत्र मात्रादिशब्दानां गुरुतल्पस्त्रीविशेषपरत्वादजीवद्विभागे माता ऽप्यंशं दायभागं हरेदित्यन्ये।

[103.] मेधातिथिमतं तु वर्णव्यवस्थया पूर्वमे-

Digitized by Google

वोक्तं ॥ अथ भ्रातॄणां दायविभागो याश्चानपत्याः स्त्रियस्तासामापुत्रलाभादिति [वसिष्ठः] ॥

[104.] अस्यार्थः । याः पितुस्स्त्रियो ऽनपत्या गर्भस्थापत्यास्तासामापुत्रलाभादाप्रसवात् । सह वासेन स्थितानां भ्रातॄणां प्रसूतापत्यलिंगज्ञानानन्तरं दायविभाग इति ॥

[105.] नन्वत्र भ्रातॄणामनपत्यस्त्रीणां च दायविभागो भवतीति ऋज्वर्थः । किमिति परित्यज्यते ॥

[106.] अनपत्यस्त्रीणामापुत्रलाभादिति विरुद्धार्थप्रतीतेस्स्त्रीणां दायानर्हाणां दायविभागासंभवाच्च परित्यज्यते ॥

[107.] अत एव स्मृत्यन्तरं । जनन्यस्वधना पुत्रैर्विभागे ऽंशं समं हरेदिति ॥

[108.] अस्वधना प्रातिस्विकस्त्रीधनशून्या जननी पुत्रैरेव जीवद्विभागे क्रियमाणे पुत्रात्सममंशं हरेदित्यर्थः ॥

[109.] अत्र जननीग्रहणं सापत्न्यादेरुपलक्षणार्थं॥ मातरः पुत्रभागानुसारिभागहारिण्य इति ॥

[110.] अस्वधनेति विशेषणोपादानात्स्वधने विद्यमाने तेनैव जीवनस्य स्वानुष्ठेयस्य च धनसाध्यस्य कर्मणस्सिद्धिसंभवे नांशग्रहणमिति प्रती-

Digitized by Google

यते ॥ स्वधनमात्राज्जीवनधनसाध्य कर्मणोऽसिध्यसं-
भवे स्वधनानामपि न समभागहरणं किन्तु यथो-
पयोगन्यूनभागस्यैव हरणमिति गम्यते ॥

[111.] तथा विभाज्यराशेरतिबहुत्वे निर्धनाना-
मपि जनन्यादीनां न समांशग्रहणं । किन्तु यथा
स्वोपयोगं समांशान्न्यूनस्यैवांशस्य ग्रहणमित्यव-
गम्यते ॥ अस्वधनेति विशेषणस्य उपयोगवशादं-
शहरणं जनन्याः न पुनर्भ्रातृवद्दायभागित्ववशा-
दिति ज्ञापनार्थत्वात् । न तु सममिति विशेषणस्यो-
पयोगवशात् ॥ असमांशस्य हरणे ऽपि अवैयर्थ्यात् ॥

[112.] जीवद्विभागस्थले पतीच्छया पत्नीनाम-
धिकांशस्यापि दातुमर्हत्वादित्युक्तं प्राक् ॥ अस्मिन्न
जीवद्विभागस्थले भ्रातॄणामिच्छानुसारेण मातुरंशो
दातव्यः समो वाधिको वा ॥ यदीच्छा नास्त्य-
ल्पविभाज्यराशेरधिकस्य प्राप्तस्य निवृत्त्यर्थत्वात्स-
ममिति पदमित्यनुसंधेयं ॥

[113.] अत एव तत्सर्वमपि सन्धायैव याज्ञ-
वल्क्येन । यदि कुर्यात्समानंशान् पत्न्यः कार्याःसमां-
शिका इत्यभिधाय न दत्तं स्त्रीधनं यासां भर्त्रा वा
श्वशुरेण वा इत्यभिहितं ॥ यदि स्त्रीधनं दत्तं चेत्तासां
पत्नीनां नांशहरत्वमिति ॥

Digitized by Google

[114.] अत एवोक्तं चन्द्रिकाकारेण । तेनात्र न मातुस्स्वत्वव्यवस्थापको दायविभागः । किन्तु यावदर्थमेवार्थहरणमिति मन्तव्यमिति ॥

[115.] यत्तु विज्ञानयोगिना भ्रातॄणामथ दंपत्योरिति वचनव्याख्याने । तस्माद्भार्याया अपि द्रव्यस्वाम्यमस्त्यन्यथा स्तेयं स्यादिति । तत्तु दायहरत्वप्रतिपादकं न भवति । किन्त्वतिथिभोजनभिक्षाप्रदानादिस्वाम्यमात्रमित्यनुसन्धेयं ॥

[116.] अपरार्केण तु यदि कुर्यात्समानंशानित्यत्रांशशब्दो विभाज्यद्रव्यैकदेशपरः ॥ अतश्च पत्नीनामंशहरत्वं नास्तीति पत्युरिच्छया यत्किञ्चिद्देयमित्येवं परमिति ॥

[117.] अतो मतत्रये ऽपि न दायभाक्त्वं स्त्रीणामपि त्वंशहरत्वं ॥ तच्च स्त्रीधनसद्भावासद्भावतत्तारतम्यनिबन्धनं प्रागुक्तमनुसन्धेयं ॥

[118.] भाष्यकारमते तु शूद्रपत्नीनां विभागो लोकाचारात्सिद्ध इति मन्तव्यं ॥

[दुहितृविभागः]

[119.] यत्तु विष्णुनोक्तमनूढाश्च दुहितरः पुत्रभागानुसारेण भागहारिण्य इति तत्त्वनूढा इति

Digitized by Google

विशेषणोपादानात्स्वविवाहार्थं पुत्रभागानुसारि-भागग्रहणं यथाशक्ति। न पुनर्मातॄणामिव जीवनार्थमंशहरत्वमिति गम्यते॥

[120.] अत एव देवलेनोक्तं। कन्याभ्यश्च पितृद्रव्यं देयं वैवाहिकं वसु।

विवाहप्रयोजनकधनमित्यर्थः॥

[121.] अत एवाह याज्ञवल्क्यः। भगिन्यश्च निजादंशाद्दत्वांश तु तुरीयकमिति॥

अस्यार्थः। भगिन्यश्चासंस्कृतास्संस्कर्तव्या भ्रातृभिः। किं कृत्वा निजादंशाच्चतुर्थमंशं दत्वा॥ अनेन दुहितरोऽपि पितुरूर्ध्वमंशभागिन्य इति गम्यते॥

[122.] तत्र निजादंशादिति प्रत्येकं परिकल्पितादंशादुद्धृत्य चतुर्थांशो दातव्य इत्ययमर्थो न भवति। किन्तु यज्जातीया कन्या तज्जातीयपुत्रभागाच्चतुर्थांशभागिनी सा कर्तव्या॥

[123.] एतदुक्तं भवति। यदि ब्राह्मणजातीया सा कन्या तदा ब्राह्मणी पुत्रस्य यावानंशो भवति तस्य चतुर्थांशस्तस्या भवतीति॥ तद्यथा। यदि कस्यचिद्ब्राह्मणी पत्नी तस्य चैकः पुत्रः कन्या चैका तत्र तत्पित्र्यं सर्वमेतद्द्रव्यं द्विधाविभज्य तत्रैकं भागं चतुर्धाविभज्य तुरीयांशं कन्यायै दत्वा शेषं पुत्रो गृह्णी-



Digitized by Google

यात् ॥ अथ तु द्वौ पुत्रावेका कन्या तदा पितृधनं त्रेधाविभज्य तत्रैकं भागं चतुर्धाविभज्य तुरीयांशं कन्यायै दत्वा शेषं द्वौ पुत्रौ विभज्य गृह्णीतः ॥ अथ त्वेकः पुत्रः कन्ये द्वे तदा पितृधनं त्रेधाविभज्य एकं भागं चतुर्धाविभज्य द्वौ भागौ द्वाभ्यां कन्याभ्यां दत्वावशिष्टमंशं सर्वं पुत्रो गृह्णातीति ॥

[124.] एवं समानजातीयेषु समविषमेषु भ्रातृभगिनीषु योजनीया ॥ यदा तु ब्राह्मणीपुत्र एकः क्षत्रियाकन्यैका तत्र पित्र्यं द्रव्यं सप्तधाविभज्य क्षत्रियापुत्रभागांस्त्रींश्चतुर्धाविभज्य चतुर्थमंशं क्षत्रियाकन्यायै दत्वा शेषं सर्वं ब्राह्मणीपुत्रो गृह्णाति ॥

यदा तु द्वौ ब्राह्मणीपुत्रौ क्षत्रियाकन्यैका तत्र पित्र्यं धनमेकादशधाविभज्य तेषु त्रीनंशां क्षत्रियापुत्रभागाञ्चतुर्धाविभज्य चतुर्थमंशं क्षत्रियाकन्यायै दत्वा शेषं सर्वं ब्राह्मणीपुत्रौ गृह्णीतः ॥

[125.] एवं जातिवैषम्ये भ्रातॄणां भगिनीनां च संख्यायास्साम्ये वैषम्ये च सर्वत्रोहनीयं ॥

[126.] न तु दत्वांशं तु तुरीयकमिति तुरीयांशविवक्षयासंस्कारमात्रोपयोगिद्रव्यं दत्वेति व्याख्यानं युक्तं । वचनविरोधात् ॥ स्वेभ्यो ऽंशेभ्यस्तु कन्याभ्यः

Digitized by Google

स्वं दद्युर्भ्रातरः पृथक्। स्वात्स्वादंशाच्चतुर्भागं पतितास्स्युरदित्सव इति॥

[127.] अस्यार्थः। ब्राह्मणादयो भ्रातरः ब्राह्मणीप्रभृतिभ्यो भगिनीभ्यः स्वजातिविहितेभ्यो ऽंशेभ्यश्चतुरंशां हरेद्विप्र इत्यादि वक्ष्यमाणेभ्यः स्वात्स्वादंशादात्मीयादात्मीयाद्भागाच्चतुर्थं तुरीयमंशं भागं दद्युः॥ न च स्वात्मीयभागादुद्धृत्य चतुर्थांशो देय इत्युच्यते। किन्तु स्वजातिविहितादेकस्मादंशात्। पृथक्पृथगेकैकस्यै कन्यायै चतुर्थांशो देय इति जातिवैषम्ये संख्यावैषम्ये च विभागक्लृप्तिरुक्तैव॥

[128.] पतितास्स्युरदित्सव इत्यदाने प्रत्यवायस्मरणादवश्य दातव्यता प्रतीयते॥

[129.] अचापि चतुर्भागवचनमविवक्षितं। संस्कारोपयोगिद्रव्यदानमेव विवक्षितमिति चेत्॥ न। स्मृतिद्वये ऽपि चतुर्थांशदानाविवक्षायां प्रमाणाभावात्। अदाने प्रत्यवायस्मरणाच्चेति॥

[130.] यद्यपि कैश्चिदुक्तमंशदानविवक्षायां बहुभ्रातृकाया बहुधनत्वं बहुभगिनीकस्य निर्धनता प्राप्नोतीति तदुक्तरीत्या परिहृतमेव॥ न ह्यत्रात्मीयाद्भागादुद्धृत्य चतुर्थांशस्य दानमुच्यते। येन तथा

Digitized by Google

स्यात् ॥ तस्मात्पितुरूर्ध्वं कन्यार्थंशभागिनीपूर्वं यत्कि-ञ्चित्पिता ददाति तदेव विशेषवचनाभावादिति ॥

[131.] एतच्च सर्वमसहायमेधातिथिविज्ञानयोगिप्रदीपिकाकारादीनां मत एव ॥

[132.] तन्मतं भारूच्यपरार्कप्रभृतयो न मन्यन्ते ॥

[133.] पितुरूर्ध्वं जीवति वा पितरि कन्यानांशभागिनी जीवति पितरि पित्रा स्वेच्छया पुत्रिकाणां यत्किञ्चिद्दातव्यं ॥ पितर्युपरते भ्रातृभिरप्यनूढानां संस्कारोपयोगे ऽप्रतिष्ठितानां प्रतिष्ठोपयोगे द्रव्यं दातव्यं । न तु ताश्चतुर्थांशहरा इति ॥ चतुर्थांशप्रतिपादकवचनानि तु संस्कारोपयोगिद्रव्यप्रतिपादनपराणि प्रतिष्ठोपयोगिद्रव्यप्रतिपादनपराणि ॥ अनूढानामप्रतिष्ठितानामेवांशो दातव्य इति विष्णुवचने ऽनूढत्वाप्रतिष्ठितत्वविशेषणविशेषितानामेव भगिनीनामंशदानं प्रतीयते । तच्च प्रतिष्ठोपयोगिविवाहोपयोगि वा प्रतीयते ॥ पतितास्स्युरदित्सव इत्यदाने प्रत्यवाय स्मरणं तु प्रतिष्ठोपयोगिद्रव्यदाने न प्रतिष्ठाया अकरणे संस्कारोपयोगिद्रव्यदाने न संस्काराकरणे प्रत्यवाय इत्यवगन्तव्यं ॥ जीवति पितरि दुहितॄणां यत्किञ्चिद्दानं एवमजीवति पितरि यदि दृष्टार्थत्वे सिद्धे ऽदृष्टार्थकल्पना अन्याय्या एतासां

Digitized by Google

स्मृतीनां न्यायमूलत्वादिति भारुच्यपरार्कयज्ञपती-
यादीनां मतं ॥ अत एव बृहद्विष्णुनोक्तं। अनूढानां
च कन्यानां स्ववित्तानुसारेण संस्कारं कुर्यादिति ॥

[134.] अथ विशेषमाह शंखः। विभज्यमाने दायाद्ये कन्यालंकारं वैवाहिकं स्त्रीधनं च कन्या लभेतेति ॥

कन्यालंकारं कन्यया स्वधृतमलंकारं। स्त्रीधनं मातृधनं ॥

[135.] अथ बोधायनः। मातुरलंकारं दुहितरस्सांप्रदायिकं लभेरन्नन्यद्वेति ॥

सांप्रदायिकं मातृपरंपरायातं। अन्यत्तदितरत् भ्रातृभिस्स्वेच्छया दत्तं कुमार्यो लभेरन् ॥

[136.] दुहितरस्सांप्रदायिकं लभेरन्नित्यस्यापवादमाह याज्ञवल्क्यः। मातुर्दुहितरश्शेषमृणात्ताभ्य ऋते ऽन्वय इति ॥ मातुर्धनं दुहितरो विभजेरन्नृणाच्छेषं तत्कृतर्णापाकरणावशिष्टं ॥

[137.] एतदुक्तं भवति। मातृकृतमृणं पुत्रैरेवापाकरणीयं न दुहितृभिः ऋणावशिष्टं धनं दुहितरो गृह्णीयुरिति च ॥

[138.] युक्तं चैतत्। पुमान् पुंसो ऽधिके शुक्रे स्त्री भवत्यधिके स्त्रिया इति स्त्र्यवयवानां दुहितृषु बा-

Digitized by Google

हुल्यात् स्त्रीधनं दुहितृगामि । पितृधनं पुत्रगामि । पित्र्यवयवानां पुत्रेषु बाहुल्यादिति ॥

[139.] अथ गौतमेन विशेषो दर्शितः । स्त्रीधनं दुहितॄणामप्रत्तानामप्रतिष्ठितानां चेति ॥

[140.] अस्यार्थः । प्रत्ताप्रत्तासमवाये ऽप्रत्ताना-मेव स्त्रीधनं । प्रत्तासु प्रतिष्ठिताप्रतिष्ठितासमवाये ऽप्रतिष्ठितानामेव ॥

अप्रत्ता अनूढाः । अप्रतिष्ठिा निर्धनाः ॥

[141.] दुहित्रभावे मातृधनमृणावशिष्टं को गृह्णीयादित्यत आह । ताभ्य ऋते ऽन्वय इति ॥ ताभ्यो दुहितृभ्यो विना दुहितॄणामभावे ऽन्वयः पुत्रादिर्गृह्णीयात् ॥ एतच्च पित्रोरूर्ध्वं विभजेरन्नित्यनेनैव सिद्धं स्पष्टार्थमुक्तमिति विज्ञानयोगी ॥

[142.] एतच्च मातुर्दुहितरश्शेषमिति वचनमन्यथा व्याकुर्वन्ति भारुचिप्रभृतयः पुत्राभावे मातुर्धनं दुहितरो विभजेरन्तदभावे स्वान्वयः । पितृव्यादिर्गृह्णीयात् । दायादा ऊर्ध्वमाप्नुयुरिति स्मृतेः ॥

ऊर्ध्वं धनस्वामिनः पुत्रिकादेरभाव इत्यर्थः ॥ दायादाः धनस्वामिपुत्रिका पितृव्यादयः ॥

[143.] अत एवोक्तं संग्रहकारेण । पितृद्वारागतं

Digitized by Google

द्रव्यं मातृद्वारागतं च यत् । कथितं दायशब्देन तद्विभागोऽधुनोच्यत इति ॥

[144.] मातृद्वारागतद्रव्यस्य दायशब्दवाच्यत्वाद्दायार्हत्वं पुत्राणामेव न तु स्त्रीणां । तस्मात् स्त्रियो निरिन्द्रिया अदायादीरिति श्रुतेः ॥ स्त्रीणां दायविभागो नास्ति निरिन्द्रियत्वादिति गौतमस्मृतेश्च ॥

[145.] भ्रातृसद्भावे दुहितॄणां मातुरलंकारादिकं भ्रातॄणामिच्छया यत्किञ्चिद्देयं तदेव गृहीतव्यं नान्यदिति प्रतिपादयन्तः ॥

[146.] अत्र विशेषमाह हारीतः । अनेडमूका जात्यन्धा विकलांगाश्च कन्यकाः । संस्कार्याः पैतृकाद्रिक्थाद्भ्रातृभिर्मनुरब्रवीत् ॥

अनेडमूकाः वक्तुं श्रोतुमसमर्थाः । विकलांगाः न्यूनांगा अधिकांगाश्च ॥ पैतृकाद्रिक्थादिति सामान्यनिर्देशात्सर्वं वा रिक्थं भ्रातृभिर्वराय दत्वा संस्कर्तव्या इति वचनार्थः ॥

[147.] केचिदनेडमूकत्वादिदोषदुष्टानां विवाहसंस्कारो नेति वदन्ति । तदपास्तमिति वेदितव्यं॥

[दायानर्हाः]

[148.] मनुरपि दायानर्हा नाह । अनंशौ क्लीब-

Digitized by Google

पतितौ जात्यन्धबधिरौ तथा। उन्मत्तजडमूकाश्च ये च केचिन्निरिन्द्रियाः॥

[149.] अस्यार्थः। अनंशौ क्लीबपतिताविति द्वित्वोक्त्या दायार्हभ्रातृभिः रिक्थग्राहैर्वा योषिद्ग्राहैर्वा पोष्यौ॥

जात्यन्धबधिराविति द्वित्वोक्त्या तयोरंशो ऽस्त्येव। किन्त्वंशयुक्तावपि पोष्यौ विवाहसद्भावात्॥

तथाशब्दप्रयोगेण पंग्वादयः विवाहसंस्कारार्हाश्चेदंशहराः पोष्याश्चेति रहस्यं॥

उन्मत्तजडमूकाश्चेति समुच्चयोक्त्या ते ऽपि भर्तव्या एव नांशहराः। विवाहार्हा न चेदिति शेषः॥ ये च केचिन्निरिन्द्रिया इति स्त्रीणामप्युपलक्षणं॥ निरिन्द्रियाणां स्त्रीणां सपत्नीदुहितृभगिनीप्रभृतीनां पुंसां च भ्रातृतत्सुतपितृव्यादीनां मातुलादीनां च संरक्षणं कार्यमिति॥

[150.] केचित्तु निरिन्द्रिया व्याधिना विनष्टघ्राणादीन्द्रिया इत्याहुः॥

[151.] यत्तु नारदेनोक्तं। पितृद्विट् पतितष्षण्डो यश्च स्यादवपातितः। औरसा अपि नैवांशं लभेरं क्षेत्रजाः कुतः॥ अवपातितो महापराधो बन्धुभिर्बहिष्कृतः। पतितषण्डौ स्पष्टौ। पितृद्वेषो नाम

ऽसौ मम पिता नेत्येवं रूपः। अन्यथा पितुः पक्ष-पाते पुत्राणां द्वेषसंभवे तत्र भागस्य विहितत्वात्॥

[152.] वसिष्ठो ऽपि। अनंशास्त्वाश्रमान्तरगता इति॥

गृहस्थाश्रममुपेक्ष्येति शेषः॥

[153.] अत एवाह देवलः। मृते न पितरि क्लीबकुष्ठोन्मत्तजडान्धकाः। पतितः पतितापत्यं लिंगीदायांशभागिनः॥

मृते पितरि क्लीबादयो दायांशिनो न भवन्तीत्यर्थः॥ लिंगीनैष्ठिकवनस्थादिः। क्षपणकपाशुपतादिश्च। पतितापत्यमिति पातित्यदशायामुत्पन्नपुत्रः। तत्पूर्वोत्पन्नपुत्रस्य पितृगतपातित्यदोषानुषंगाभावात्॥ पितृपुत्रसंबन्धो लौकिकः पातित्यादौ निवर्तेत इति पुरस्तान्निवेदयिष्यते॥

[154.] तथा च विष्णुः। तेषामेवौरसाः पुत्रा भागहारिणो। न तु पतितस्य। पतनीये कृते कर्मण्यनन्तरोत्पन्नाः। प्रतिलोमासु स्त्रीषूत्पन्नाश्चाभागिनस्तत्पुत्राः पैतामहे ऽप्यर्थे इति॥

मृते पितरीत्यत्रापिशब्दो ऽध्याहार्यः। पितरि मृते ऽप्यमृते ऽपीति क्लीबादयो नांशहरा इति व्याख्येयं॥

[155.] तथा चाहापस्तंबः। जीवन्पुत्रेभ्यो दायं



Digitized by Google

विभजेत्समं क्लीबमुन्मत्तं पतितं च परिहाप्येति ॥ परिहाप्यवर्जयित्वा ॥ चशब्दो विवाहानर्हाणामुपलक्षकः ॥

[156.] चंद्रिकाकारस्तु मृते पितरीति विभागकालप्रदर्शनार्थमित्याह ॥ तेन विभागकाले स्थितक्लैब्यादिशालिनामप्यभागहरत्वं । न पुनः क्लैब्यबाधिर्यादिशालिनामेवेति मन्तव्यमिति ॥

[157.] यत्तु याज्ञवल्क्येनोक्तं । औरसाः क्षेत्रजास्त्वेषां निर्दोषाभागहारिण इति तद्द्वापरादियुगविषयमिति मन्तव्यं । कलौक्षेत्रजपुत्रनिषेधात् ॥

[158.] तथा च निरंशकपुत्राणामंशग्रहणविरोधिव्याध्याद्यभावे पैतामहधनप्राप्तिः । तत्पुत्राः पितृदायांशं लभेरन्दोषवर्जिता इति देवलवचनात् ॥ दोषाः क्लैब्यादयः ॥

[159.] अत्र याज्ञवल्क्यः । क्लीबो ऽथ पतितस्तज्जः पंगुरुन्मत्तको जडः । अन्धाचिकित्सरोगाद्याभर्तव्याः स्युर्निरंशकाः ॥

तज्जः पतितोत्पन्नः ।

आद्यशब्दो निरिन्द्रियादिसंग्रहार्थः ।

भरणं यावज्जीवं । यावज्जीवं भर्तव्या इति मनुस्मृतेः ॥

Digitized by Google

## [भिन्नजातिविभागः]

[160.] भिन्नजातीयानां विभागे विशेषमाह याज्ञवल्क्यः । चतुस्त्रिद्व्येकभागास्स्युर्वर्णशो ब्राह्मणात्मजाः । क्षत्रजास्त्रिद्व्येकभागा विड्जास्तु द्व्येकभागिनः ॥

[161.] ब्राह्मणस्य चत्वारो भार्याः क्षत्रियस्य तिस्रः वैश्यस्य द्वे शूद्रस्यैकैव भार्या इति ॥

तिस्रो वर्णानुपूर्व्येणेति दर्शिताः ॥

[162.] तत्र ब्राह्मणोत्पन्नाः ॥ वर्णशब्देन ब्राह्मणादिवर्णास्त्रय उच्यन्ते । वीप्सायां शस्प्रत्ययः ॥ अतश्च वर्णे वर्णे ब्राह्मणोत्पन्ना यथाक्रमं चतुस्त्रिद्व्येकभागास्स्युर्भवेयुः ॥

[163.] एतदुक्तं भवति । ब्राह्मणेन ब्राह्मण्यामुत्पन्नाः एकैकश्चतुरश्चतुरो भागां लभन्ते । तेनैव क्षत्रियायामुत्पन्नास्त्रींस्त्रीन् । वैश्यायामुत्पन्ना द्वौ द्वौ । शूद्रायामुत्पन्ना एकमेकमिति ॥

[164.] क्षत्रजाः क्षत्रियोत्पन्नाः । वर्णश इत्यनुवर्तते ॥ यथाक्रमं त्रिद्व्येकभागाः । क्षत्रियेण क्षत्रियायामुत्पन्नाः प्रत्येकं त्रींस्त्रीं भागां लभन्ते ॥

[165.] वैश्यायामुत्पन्ना द्वौ द्वौ । शूद्रायामुत्पन्नाः

Digitized by Google

एकमेकमिति ॥ विड्जा वैश्यजाः ॥ वर्णशो ह्येकभागिनः । वैश्येन वैश्यायामुत्पन्ना द्वौ द्वौ लभन्ते ॥

[166.] शूद्रायामेकमेकं । शूद्रस्यैकैव भार्येति भिन्नजातीयपुत्राभावात्तत्पुत्राणां पूर्वोक्त एव समविभागः ॥

[167.] एतच्च स्मृत्यन्तरानुसारेणोक्तं याज्ञवल्क्येन। तन्मते ब्राह्मणस्य शूद्राविवाहस्य निषिद्धत्वात् ॥ यत उक्तं तेनैव। न तन्मम मतं यस्मात्तत्रायं जायते स्वयमिति ॥

तदिति शूद्राविवाहो ब्राह्मणकर्तृकः परामृश्यते ॥

## [विभाज्याविभाज्यद्रव्यं]

[168.] विभाज्यद्रव्यमाह कात्यायनः। पैतामहं च पित्र्यं च यच्चान्यत्स्वयमर्जितं । दायादानां विभागे ऽपि सर्वमेतद्विभज्यते ॥

स्वयमर्जितं पित्राद्यविभक्तद्रव्योपयोगेन स्वयमर्जितं। तदन्यथा स्वयमर्जितस्याविभाज्यत्वात् ॥

[169.] यथाह याज्ञवल्क्यः। पितृद्रव्याविरोधेन यदन्यत्स्वयमर्जितं। मैत्रमौद्वाहिकं चैव दायादानां न तद्भवेत् ॥ क्रमादभ्यागतं द्रव्यं हृतमभ्युद्धरेत्तु यः। दायादेभ्यो न तद्दद्याद्विद्यया लब्धमेव च ॥

Digitized by Google

[170.] मातापित्रोर्द्रव्याविनाशेन यत्स्वयमर्जितं। मैत्रं मित्रसकाशाल्लब्धं। औद्वाहिकं विवाहाल्लब्धं। दायादानां भ्रात्रादीनां न तद्भवेत्॥

किञ्च क्रमादभ्यागतं पितृक्रमायातं। यत्किञ्चिद्द्रव्यमन्यैर्हृतमसामर्थ्यादिना पित्रादिभिरनुद्धृतं यः पुत्राणां मध्य उद्धरति। तद्दायादेभ्यो भ्रातृभ्यो न दद्यात्। उद्धर्तैव गृह्णीयात्॥

[171.] तत्र विज्ञानयोगिना पुत्राणां मध्य इतराभ्यनुज्ञयाय उद्धरति तद्दायादेभ्यो न दद्यादित्युक्तं॥ तन्न सहते ऽपरार्कः। इतराभ्यनुज्ञयैव तेषां तदंशे ऽनधिकारादेतद्वचनवैयर्थ्यात्॥

[172.] षष्ठे तुरीयांशं लभत इत्याह शंखः। पूर्वनष्टां तु यो भूमिमेकश्चेदुद्धरेत्क्रमात्। यथा भागं लभन्ते ऽन्ये दत्वांशं तु तुरीयकमिति॥

क्रमादित्यत्राभ्यागतमिति शेषः॥

[173.] यदन्यत्स्वयमर्जितमित्यस्यार्थो मनुना स्पष्टीकृतः। तथा हि। अनुपघ्नन् पितृद्रव्यं श्रमेण यदुपार्जयेत्।

श्रमजनितेन कृष्यादिनेति यावत्॥

पितृद्रव्यमित्यत्र पितृग्रहणमविभक्तोपलक्षणार्थं। अनुपघ्नन्नपीडयन्॥

[174.] व्यासो ऽपि । अनाश्रित्यपितृद्रव्यं स्वशक्त्याप्नोति यद्धनं। दायादेभ्यो न तद्दद्यादिति प्राह॥

[175.] प्रजापतिरपि। विद्याशौर्येश्रमैर्लब्धं स्त्रीधनं माधुपर्किकं । मैत्रमौद्वाहिकं चैव भ्रातृभिर्न विभाज्यतेति ॥

विद्यया वेदाध्ययनेनाध्यापनेन वा वेदार्थव्याख्यानेन वा यल्लब्धं तदपि दायादेभ्यो न दद्यात् । आर्जक एव गृह्णीयात्॥

[176.] एवंविधेषु स्थलेषु द्रव्यस्यैकनिष्ठत्वे ऽपि विभक्तत्वमस्तीति भारुचिना प्रागेव प्रपञ्चितं ॥

[177.] विद्याधनस्वरूपमाह कात्यायनः । उपन्यस्य तु यल्लब्धं विद्यया पणपूर्वकं। विद्याधनं तु तद्विद्याद्विभागे न नियुज्यते ॥ शिष्यादार्त्विज्यतः प्रश्नात् सन्दिग्धप्रश्ननिर्णयात् । सुज्ञानशंसनाद्वादाल्लब्धं प्राध्ययनाच्च यत् । विद्याधनं तु तत्प्राहुर्विभागे न नियुज्यते॥ पदं निरस्य यल्लब्धं विद्यातो द्यूतपूर्वकं। विद्याधनं तु तद्विद्यान्न विभाज्यं बृहस्पतिः॥ विद्याप्रतिज्ञया लब्धं शिष्यादाप्तं च यद्भवेत्। ऋत्विजायेन यल्लब्धमेतद्विद्याधनं भृगुः॥

प्राध्ययनं घटिकाशतकादिनिर्माणमन्नदानाध्ययनं वा ॥

[178.] अत्र च। पितृद्रव्याविरोधेन यत्किञ्चित्स्वयमर्जितमिति सर्वशेषः॥ अतश्च पितृद्रव्याविरोधेन यन्मैत्रमार्जितं पितृद्रव्याविरोधेन यदौद्वाहिकं पितृद्रव्याविरोधेन यत्क्रमायातमुद्धृतं पितृद्रव्याविरोधेन विद्यया यल्लब्धमिति प्रत्येकमभिसंबध्यते॥

[179.] तथा च पितृद्रव्यविरोधेन प्रत्युपकारेण यन्मैत्रं पितृद्रव्यविरोधेनासुरादिविवाहेन च यल्लब्धं तथा पितृद्रव्यविरोधेन यत्क्रमायातमुद्धृतं तथा पितृद्रव्यव्ययाल्लब्धया विद्यया यल्लब्धं तत्सर्वं सर्वैर्भ्रातृभिर्विभजनीयं॥

[180.] तथा पितृद्रव्याविरोधेनेत्यस्य सर्वशेषत्वादेव पितृद्रव्यविरोधेन प्रतिग्रहलब्धमपि विभजनीयं॥

[181.] अस्य सर्वशेषत्वाभावे मैत्रमौद्वाहिकमित्यादिनारब्धव्यं॥

[182.] अत्र पितृद्रव्यविरोधेनापि यन्मैत्रादिलब्धं तस्याविभाज्यत्वाय मैत्रादिवचनमर्थवदित्युच्यते॥

[183.] तथा सति समाचारविरोधो विद्यालब्धे नारदवचनविरोधश्च॥ कुटुंबं बिभृयाद्भ्रातुर्यो विद्यामधिगच्छतः। भागं विद्याधनात्तस्मात्स लभेताश्रुतोऽपि सनिति॥

[184.] पितृद्रव्याविरोधेनेत्यस्य भिन्नवाक्यत्वे

Digitized by Google

प्रतिग्रहलब्धस्याविभाज्यत्वमाचारविरुद्धमापद्यते ॥ एतच्च स्पष्टीकृतं मनुना । अनुपघ्नन् पितृद्रव्यमित्याद्युक्तं प्राक् ॥

[185.] विद्याधनस्याविभाज्यत्वलक्षणमुक्तं कात्यायनेन । परभक्तोपयोगेन विद्या प्राप्तान्यतस्तु या । तया लब्धं धनं यत्तु विद्याप्राप्तं तदुच्यत इति ॥

परशब्दो ऽत्राविभक्तापेक्षया यद्भक्तमन्तरं तत्र प्रयुज्यते । भक्तशब्दो द्रव्यमात्रोपलक्षकतया प्रयुक्तः ॥

[186.] अतश्च पितृद्रव्याविरोधेनेत्यस्य सर्वशेषतायुक्तेत्यनुसन्धेयं ॥

[187.] ननु पितृद्रव्याविरोधेन यन्मैत्रादिना लब्धं द्रव्यं तदविभाज्यमिति न वक्तव्यं विभागप्राप्त्यभावात् । यद्येन लब्धं तत्तस्यैव स्वं नान्यस्येति प्रसिद्धं । प्राप्तिपूर्वकश्च प्रतिषेधः ॥

[188.] उच्यते । समवेतैस्तु यत्प्राप्तं सर्वे तत्र समांशिन इति प्राप्तस्यापवादः ॥

[189.] अत्र हारीतः । योगक्षेमं प्रचारान्न विभजेरन्निति ॥

अप्राप्तस्य प्राप्तियोगः । प्राप्तस्य रक्षणं क्षेमः ॥

[190.] योगक्षेमशब्दार्थमाह लौगाक्षिः । क्षेमं

Digitized by Google

पूर्तं योगमिष्टमित्याहुस्तत्त्वदर्शिनः । अविभाज्ये च ते प्रोक्ते शयनासनमेव चेति ॥

[191.] तदयमर्थः । योगशब्देनालब्धकारणं श्रौतस्मार्ताग्न्यादिसाध्यमिष्टं कर्म लक्ष्यते । क्षेमशब्देन लब्धपरिपालनहेतुभूतं तडागारामनिर्माणादिपूर्तं कर्म लक्ष्यते ॥ तदुभयं पैतृकमपि पितृद्रव्यविरोधार्जितमप्यविभाज्यमिति ॥

[192.] केचित्तु योगक्षेमकारिणो राजमन्त्रिपुरोहितादय उच्यन्त इत्याहुः ॥ छत्रचामरशस्त्रवाहनप्रभृतय इत्यन्ये ॥

[193.] प्रचारो गृहारामादिषु प्रवेशनिर्गममार्गः सो ऽप्यविभाज्यः ॥

[194.] नारदस्तु विशेषमाह । माचा च स्वधनं दत्तं यस्मै तु प्रीतिपूर्वकं । तस्याप्येषविधिदृष्टो मातापीष्टे पिता यथा ॥ स्वधन इति शेषः ॥ एषविधिः अविभाज्यत्वविधिः पितृदत्तविषयोक्तः ॥

[195.] यत्तूशनसा क्षेत्रस्याविभाज्यत्वमुक्तं । अविभाज्यं सगोत्राणामासहस्रकुलादपि । याज्यं क्षेत्रं च पत्रं च कृतान्नमुदकं स्त्रियः ॥ तद्ब्राह्मणोत्पन्नक्षत्रियापुत्रविषयं ॥ न प्रतिग्रहभूर्देया क्षत्रियादिसुताय

वे। यद्यप्येतां पिता दद्यान्मृते विप्रासुतो हरेदिति स्मरणादिति॥

विज्ञानेश्वरासहायमेधातिथीनामियं व्याख्या॥

[196.] भारुच्यपरार्क चन्द्रिकाकारादीनां तु याजनसकाशादुत्पन्नो लाभो विभजनीयः क्षेत्रं चाखिलदायादानुमत्या विभजनीयं। दायादैर्नाभ्यनुज्ञातं यत्किञ्चित् स्थावरे कृतं। तत्सर्वमकृतं ज्ञेयं यद्येको ऽपि न मन्यत इति प्रजापतिस्मरणात्॥ लोके रिक्थविभागे ऽपि न कश्चित् प्रभुतामियात्। भोग एव तु कर्तव्यो न दानं न च विक्रय इति॥

लोके कुलक्रमायाते स्थावरादौ न कश्चित्पित्रादिरपि। रिक्थविभागे ऽपि शब्दाद्विक्रयादावपि प्रभुतामिति यावत्॥ तत्र दायादानुमतिमन्तरेण न विभागविक्रयदानानि कुर्यादिति तस्यार्थ इति व्याख्यातवन्तः॥

[197.] तथोक्तं मनुना। वस्त्रं पत्रमलंकारं कृतान्नमुदकं स्त्रियः। योगक्षेमप्रचारं च न विभाज्यं प्रचक्षतेति॥

[198.] वस्त्रस्याविभाज्यत्वं धृतानामेव नान्येषां। धृतानां तु वस्त्राणां न विभाग इति शंखलिखितौ॥

Digitized by Google

[199.] पितृधृतानि तु पितुरूर्ध्वं विभजतां श्राद्ध-भोक्त्रे दातव्यानि। यथा बृहस्पतिः। वस्त्रालंकार-शय्यादिपितुर्यद्वाहनादिकं। गन्धमाल्यैस्समभ्यर्च्य-श्राद्धभोक्त्रे तदर्पयेदिति॥

[200.] अश्वादिवाहनानां बहुत्वे तु तद्विक्रयो-पजीविनां विभाज्यत्वमेव॥

[201.] अलंकारो ऽपि यो येन धृतः स तस्यैवा-धृते साधारणे विभाज्य एव॥ पत्यौ जीवति यस्स्त्री-भिरलंकारो धृतो भवेत्। न तं भजेरन्दायादा भज-मानाः पतन्ति त इति स्मृतेः॥

[202.] अत्र धृतपदोपादानादधृतानां विभाज्यत्वं गम्यते॥

[203.] कृतान्नं तण्डुलमोदकादि। तण्डुलमोद-कादीत्यत्र तण्डुलकृतानि च तानि मोदकानि च तण्डुलमोदकानि॥

[204.] यथोक्तं मनुना। तण्डुलानि च वस्त्राण्य-लंकारश्च वाहनं। जलाशयस्त्रियश्चापि न वि-भाज्यास्समा अपि॥

उदकमुदकाधारः कूपादिः। तच्च मूल्यादिद्वारेण न विभाज्यं पर्यायेणोपभोक्तव्यं।

Digitized by Google

स्त्रियश्च दास्यो विषमा । न मूल्यद्वारेण वि-
भाज्याः पर्यायेण कर्मकारयितव्याः ॥

[अविभक्तपितॄणां पुत्रैर्विभागः]

[205.] अथ पैतामहे पौत्राणां विभागे विशेषः प्रदर्श्यते ॥

[206.] तत्र याज्ञवल्क्यः । प्रमीतपितृकाणां तु पितृतो भागकल्पना । अविभक्तानां दिष्टं गतानां ये पुत्रास्तेषां पितृतो भागकल्पना । एतदुक्तं भवति ॥

[207.] यदा भ्रातरो ऽविभक्ताः पुत्रानुत्पाद्य दिष्टं गताः तत्रैकस्य द्वौ पुत्रावन्यस्य त्रयो ऽपरस्य चत्वार इति पुत्राणां वैषम्ये तत्र द्वौ स्वपित्र्यंशमेकं लभतः अन्ये त्रयो ऽप्येकमंशं पित्र्यं चत्वारो ऽप्येकमेवांशं लभन्त इति ॥

[208.] अत एवाह कात्यायनः । स एवांशस्तु सर्वेषां भ्रातॄणां न्यायतो भवेदिति ॥

स एवांशः पित्र्यंशः ॥

[209.] यद्यपि पितृभागहरत्वे ऽनेकपुत्राणां पितृभागकल्पना स्वाननुरूपा तथापि वाचनिकत्वादनुमन्तव्या ॥

[210.] तथैव ससुतयोरविभक्तयोर्भ्रात्रोर्मध्ये कस्य-

Digitized by Google

चिज्ज्ञाता मृतः तत्सुतस्तु पितृव्येण सार्धं विभजनीयः। अविभक्ते ऽनुजे प्रेते तत्सुतं रिक्थभागिनं। कुर्वीतेति कात्यायनस्मृतेः॥

[211.] तथा च विष्णुः। यद्येकः प्रमीतो द्वौ वा प्रमीतावेको वा स्थितो द्वौ वा स्थितौ तत्पुत्रा विषमसमास्तत्रापि पितृतो भागकल्पनेति॥

[212.] अत्रापि नष्टानामपि पुत्राः पित्र्यानेवांशाल्लभन्त इति वाचनिकीव्यवस्थेति विज्ञानेशः॥

[213.] अपरार्कभारुच्यादयस्तु प्रमीतपितृकाणां पुत्राणां पितृद्वारागतद्रव्यस्य दायस्य यथेष्टविनियोगार्हस्वत्वसंभवात् पितृस्वत्वस्यैव विभाग इति पितृतो भागकल्पनेति न्यायसिद्धार्थानुवादः॥ अत एवाह कात्यायनः। स एवांशस्तु सर्वेषां भ्रातॄणां न्यायतो भवेदित्याहुः।

## [पितामहद्रव्ये पितृपुत्रसमस्वाम्यं]

[214.] अत्र विशेषमाह याज्ञवल्क्यः। भूर्या पितामहोपात्तानिबन्धो द्रव्यमेव वा। तत्र स्यात्सदृशं स्वाम्यं पितुः पुत्रस्य चैव हीति॥

भूश्शालिक्षेत्रादिका।

स्त्रियश्च दास्यो विषमा । न मूल्यद्वारेण वि-
भाज्याः पर्यायेण कर्मकारयितव्याः ॥

[अविभक्तपितृणां पुत्रैर्विभागः]

[205.] अथ पैतामहे पौत्राणां विभागे विशेषः प्रदर्श्यते ॥

[206.] तत्र याज्ञवल्क्यः । प्रमीतपितृकाणां तु पितृतो भागकल्पना । अविभक्तानां दिष्टं गतानां ये पुत्रास्तेषां पितृतो भागकल्पना । एतदुक्तं भवति ॥

[207.] यदा भ्रातरो ऽविभक्ताः पुत्रानुत्पाद्य दिष्टं गताः तत्रैकस्य द्वौपुत्रावन्यस्य त्रयो ऽपरस्य चत्वार इति पुत्राणां वैषम्ये तत्र द्वौ स्वपित्रंशमेकं लभतः अन्ये त्रयो ऽप्येकमंशं पित्र्यं चत्वारो ऽप्येकमेवांशं लभन्त इति ॥

[208.] अत एवाह कात्यायनः । स एवांशस्तु सर्वेषां भ्रातॄणां न्यायतो भवेदिति ॥

स एवांशः पित्रंशः ॥

[209.] यद्यपि पितृभागहरत्वे ऽनेकपुत्राणां पितृभागकल्पना स्वाननुरूपा तथापि वाचनिकत्वादनुमन्तव्या ॥

[210.] तथैव ससुतयोरविभक्तयोर्भ्रात्रोर्मध्ये कस्य-

Digitized by Google

चिद्भ्राता मृतः तत्सुतस्तु पितृव्येण सार्धं विभजनीयः। अविभक्ते ऽनुजे प्रेते तत्सुतं रिक्थभागिनं। कुर्वीतेति कात्यायनस्मृतेः॥

[211.] तथा च विष्णुः। यद्येकः प्रमीतो द्वौ वा प्रमीतावेको वा स्थितो द्वौ वा स्थितौ तत्पुत्रा विषमसमास्तत्रापि पितृतो भागकल्पनेति॥

[212.] अत्रापि नष्टानामपि पुत्राः पित्र्यानेवांशाल्लभन्त इति वाचनिकीव्यवस्थेति विज्ञानेशः॥

[213.] अपरार्कभारुच्यादयस्तु प्रमीतपितृकाणां पुत्राणां पितृद्वारागतद्रव्यस्य दायस्य यथेष्टविनियोगार्हस्वत्वसंभवात् पितृस्वत्वस्यैव विभाग इति पितृतो भागकल्पनेति न्यायसिद्धार्थानुवादः॥ अत एवाह कात्यायनः। स एवांशस्तु सर्वेषां भ्रातॄणां न्यायतो भवेदित्याहुः।

## [पितामहद्रव्ये पितृपुत्रसमस्वाम्यं]

[214.] अत्र विशेषमाह याज्ञवल्क्यः। भूर्या पितामहोपात्तानिबन्धो द्रव्यमेव वा। तत्र स्यात्सदृशं स्वाम्यं पितुः पुत्रस्य चैव हीति॥

भूर्यशालिक्षेत्रादिका।

Digitized by Google

निबन्धो नैगमादिपण्यस्थल एकैकस्मिन् पण्ये प्रतिदिनं प्रतिमासं वेयत्पण्यमेतस्य जीवनार्थं दातव्यमिति राजामात्यप्रधानपुरुषाधिकृतो निबन्ध इत्युच्यते ॥

द्रव्यं सुवर्णरजितादि स्पष्टं ॥ यत्पितामहेन प्रतिग्रहक्रयादिना लब्धं तत्र पितुः पुत्रस्य च स्वाम्यं सदृशं समानं ।

हि यस्मात् । हि यस्माल्लोकप्रसिद्धत्वादित्यर्थः ॥

[215.] अतः पितुरिच्छयैव न विभागः । नापि पितुर्भागद्वयं ॥

[216.] अतश्च । विभागं चेत्पिता कुर्यादिच्छया विभजेत्सुतानित्येतत्स्वार्जितविषयमित्यवगन्तव्यं ॥

[217.] तथैव द्वावंशौ प्रतिपद्येत विभजन्नात्मनः पितेत्येतदपि स्वार्जितविषयं ॥

[218.] जीवतोरस्वतन्त्रस्स्याज्जरयापि समन्वित इत्येतदपि पारतन्त्र्यं मातापित्रर्जितद्रव्यविषयं ॥

[219.] तथैवानीशास्ते हि जीवतोरित्येतदपि ॥

[220.] तथा च सरजस्कायां मातरीत्येतत् । सस्पृहे च पितरि विभागमनिच्छत्यपि पुत्रेच्छयैव पितामहद्रव्ये विभागो भवतीति ज्ञायते ॥

[221.] तथाविभक्तेन पित्रा पैतामहे द्रव्ये

Digitized by Google

दीयमाने विक्रीयमाणे वा पुत्रस्य पौत्रस्य प्रपौत्रस्य निषेधे ऽप्यधिकारः ॥ पित्रर्जिते तु न निषेधाधिकारः । तत्परतन्त्रत्वात् ॥

[222.] अनुमतिस्तु कर्तव्या ॥ पैतृके पैतामहे च स्वाम्यं यद्यपि जन्मनैव तथापि पैतृके पितृपरतन्त्रत्वात्पितुश्चार्जकत्वेन प्राधान्यात्पित्रा विनियुज्यमाने स्वार्जितद्रव्ये पुत्रेणानुमतिः कर्तव्या ॥ असंभूय सुतां सर्वां न दानं न च विक्रय इति स्मरणाच्च ज्ञायते ॥ पैतामहे तु द्वयोस्स्वाम्यमविशिष्टमिति निषेधाधिकारो ऽप्यस्तीति विशेषः ॥

[223.] अत एवोक्तं मनुना । सपैतृकं पिता द्रव्यमनवाप्तं यदाप्नुयात् । न तत्पुत्रैर्भजेत्सार्धमकामस्स्वयमर्जितमिति ॥

[224.] अस्यार्थः । यत्पितामहार्जितं केनाप्यपहृतं पितामहेनानुद्धृतं यदि पितोद्धरति तत्स्वार्जितमिव पुत्रैस्सार्धमकामो ऽनीहमानः स्वयं न विभजेदिति वदन् । पितामहार्जितमकामो ऽपि पुत्रेच्छया पुत्रैस्सह विभजेदिति दर्शयतीति ज्ञायते ॥

[225.] अत एव बृहस्पतिः । द्रव्ये पितामहोपात्ते जंगमे स्थावरे ऽपि वा । सममंशित्वमाख्यातं पितुः पुत्रस्य चैव हीति ॥

Digitized by Google

[226.] व्यासोऽपि। क्रमायाते गृहक्षेत्रे पुत्रपौत्रास्समांशिन इति ॥

[विभागोत्तरोत्पन्नपुत्रविभागः]

[227.] विभागोत्तरकालमुत्पन्नस्य पुत्रस्य विभागकल्पनामाह याज्ञवल्क्यः। विभक्तेषु सुतो जातस्सवर्णायां विभागभाक् ।

[228.] अस्यार्थः। विभक्तेषु पुत्रेषु पश्चात्सवर्णायां भार्यायामुत्पन्नो विभागभाक् ।

विभज्यत इति विभागो ।

भागः पित्रोर्भागः ।

तं विभजतीति विभागभाक्। पित्रोरूर्ध्वं तयोरंशं लभत इत्यर्थः ॥

[229.] असवर्णायामुत्पन्नस्तु स्वांशमेव पित्र्याल्लभते ॥

[230.] मातृकं तु सर्वमेवेत्याह विज्ञानेशः ॥

[231.] उभयमपि सर्वमेवेत्याहुरपरार्कप्रभृतयः॥ ऊर्ध्वं विभागाज्जातस्तु पित्र्यमेव हरेद्धनमिति स्मृतेस्सामान्येन पित्रोरिदं पित्र्यमिति व्याख्यांगीकारात् ॥ तथानीशः पूर्वजः पित्रोर्भ्रातुर्भागे विभक्तज इति स्मरणात् । पित्रोर्मातापित्रोर्विभागे। विभा-

Digitized by Google

गात्पूर्वमुत्पन्नो न स्वामी। विभक्तजश्च भ्रातुर्भागे न च स्वामीति वचनार्थः॥

[232.] तथा विभागोत्तरकालं पित्रा यत्किंचिदर्जितं तत्सर्वं विभक्तजस्यैव॥

[233.] तथाह विष्णुः। पुत्रैस्सह विभक्तेन पित्रा यत्स्वयमर्जितं। विभक्तजस्य तत्सर्वमनीशाः पूर्वजास्स्मृता इति॥

[234.] ये च विभक्ताः पित्रा सह संसृष्टाः तैस्सार्धं पितुरूर्ध्वं विभक्तजो विभजेत्॥ यथाह मनुः। संसृष्टास्तेन वा ये स्युर्विभजेत स तैस्सहेति॥

[235.] यत्र पितुः द्वौ वा त्रयो वा बहवः पुत्राः तत्र कतिभिः पुत्रैर्विभक्तः कतिभिरविभक्तः। अविभक्तानामेव पित्रर्जितं द्रव्यमुपरते पितरि विभाज्यं॥

[236.] पश्चादेतैर्विभक्तः पिता चेतद्द्रव्यं पुर्वं विभक्तानां पश्चाद्विभक्तानां पुत्राणामेव विभाज्यं। न पत्न्याः॥ पत्नीदुहितर इत्यादिस्वामितासंक्रमक्रमो न पितृविषयो ऽपि तु भ्रात्रादिविषय इति पुरस्तान्निवेदयिष्यते॥

[237.] विभागसमये भ्रातृभार्यायां मातरि चास्पष्टगर्भायां विभागादूर्ध्वमुत्पन्नस्य भागकल्पनामाह

याज्ञवल्क्यः। दृश्याद्वा तद्विभागस्स्यादायव्ययविशोधितात्।

[238.] एतदुक्तं भवति। प्रातिस्विकेषु भागेषु तदुत्पन्नमायं प्रवेश्य पितृकृतमृणमपनीयावशिष्टेभ्यो भागेभ्यः किञ्चित्किञ्चिदुद्धृत्यविभक्तजस्य स्वभागसमः कर्तव्य इति॥

तद्विभाग इति। तस्य पितरि प्रेते भ्रातृविभागसमये ऽस्पष्टगर्भायां मातरि भ्रातृविभागोत्तरकालमुत्पन्नस्य विभागस्तद्विभाग इति विज्ञानेशः प्राह॥

[239.] स्पष्टगर्भायां तु प्रसवं प्रतीक्ष्य विभागः कर्तव्य इत्याह वसिष्ठः। अथ भ्रातॄणां दायविभागो याश्चानपत्यास्स्त्रियस्तासामापुत्रलाभादिति॥

गृहीतगर्भाणामाप्रसवात्प्रतीक्षणीयमिति योजनीयं॥ अवशिष्टं पर्वमेवोक्तमिति नेह पृथङ्नीयते॥

[240.] अयं च न्यायो देशान्तरगतस्यापि समान इत्याह बृहस्पतिः। गोत्रसाधारणांस्त्यक्त्वा यो ऽन्यं देशं समाश्रितः। अर्धशस्त्वागतस्यांशः प्रदातव्यो न संशयः॥

गोत्रसाधारणांस्त्यक्त्वा सर्वसहवासिनिवासिदेशमुत्सृज्येत्यर्थः॥

[241.] अत्यन्तदीर्घकालप्रोषितस्य सद्भावाज्ञानतः

Digitized by Google

कृते विभागे तस्यापि भाग इत्याह स एव॥ ऋणं लेख्यं गृहं क्षेत्रं यस्य पैतामहं भवेत्। चिरकालप्रोषितो ऽपि भागभागागतस्तु सः॥

भागभाग्धनविभागीत्यर्थः।

आगतो विभागादूर्ध्वमागतः॥

[242.] पौत्रादौ विशेषमाह स एव। तृतीयः पञ्चमश्चैव सप्तमो यो ऽपि वा भवेत्। जन्मनामपरिज्ञाने लभेतांशं क्रमागते॥ क्रमागतद्रव्यमात्रांशभागीत्यर्थः॥

[243.] केचिदत्र क्रमागतस्य भूमात्रस्यांशो नान्यस्येत्याहुः॥ यथाह विष्णुः। मौलास्सामन्ता अन्वयिनं विदुः तस्यागतस्य दातव्या गोत्रजैर्महीति॥ क्रमागतद्रव्यस्योपलक्षकमित्यपरे॥

[244.] अत्र विशेषमाह बृहद्विष्णुः। विभागादूर्ध्वमागतस्य पूर्वमागतस्य वा स्वभागं गृहीतुं प्रवृत्तस्य दृष्टादृष्टप्रमाणेनादौ तावदात्मनः परायत्तद्रव्ये स्वाम्यं साधयतो भागहरणे ऽधिकारो भवति। नान्यथेति॥

स्पष्टार्थः॥

[245.] विभक्तजः पुत्रः पित्र्यं मातृकं च धनं सर्वं गृह्णीत॥

[246.] तत्र यदि विभक्तः पिता वा माता वा

विभक्ताय पुत्राय स्नेहवशादाभरणादिकं प्रयच्छति तत्र विभक्तजेन दानप्रतिषेधो न कर्तव्यः। नापि दत्तं प्रत्यादातव्यमिति॥

[247.] यथाह विष्णुः। मातापितृभ्यां यद्दत्तं तत्तस्यैव धनं भवेदिति॥ न विभक्तजस्तस्येष्ट इति। विभक्तजस्य स्वं न भवतीत्यर्थः॥

[248.] पित्रा यद्दत्तं तत्तस्यैवेति न्यायप्रतिपादनाद्विभागात्प्रागपि यद्दत्तं तत्तस्यैवेति सिद्धं॥

[स्त्रीधनस्वरूपञ्च विभागश्च]

[249.] अथ स्त्रीधनविभागः॥

[250.] तत्र विष्णुः। सौदायिकं स्त्री यथाकाममाप्नुयादिति॥ सौदायिकं भर्तृदत्तोपलक्षकं॥

[251.] तथा च व्यासः। यच्च भर्त्रा धनं दत्तं सा यथाकाममाप्नुयादिति॥

[252.] सौदायिकं नाम। ऊढया कन्यया वापि पत्युः पितृगृहे ऽपि वा। भर्तुस्सकाशात्पित्रोर्वा लब्धं सौदायिकं स्मृतमिति॥ लब्धं धनमिति शेषः॥

[253.] तथा च व्यासः। यत्कन्यया विवाहे च विवाहात्परतश्च यत्। पितृभर्तृगृहात्प्राप्तं धनं सौदायिकं स्मृतमिति॥

Digitized by Google

[254.] ननु सौदायिकशब्दः स्वार्थे तद्धितान्तः। सुदाय एव सौदायिकं। विनयादित्वात् ठक्॥

[255.] नन्वेतदनुपपन्नं। स्वार्थिकतद्धितान्तत्वेन दायमात्रपरत्वेन स्त्रीणां दायानर्हत्वादिति चेत्॥ नैवं। स्त्रीणां भर्तृदायार्हत्वात्॥

[256.] स्वार्थिकाः प्रत्ययाः प्रकृतितो लिङ्गवचनान्यतिवर्तन्त इति न्यायात्॥ सौदायिकशब्दस्य नियतनपुंसकलिङ्गता॥

[257.] तथा च नारदः। भर्त्रा प्रीतेन यद्दत्तं स्त्रियै तस्मिन्मृते ऽपि तत्। सा यथाकाममश्नीयाद्दद्याद्वा स्थावरादृत इति॥

[258.] अतश्च यथाकाममित्यनेन स्वातन्त्र्यमुक्तं॥ एवं च सौदायिके स्थावरेतरप्रीतिदत्ते स्त्रीणां स्वातन्त्र्यमिति मन्तव्यं॥

[259.] पुरुषाणां तु स्त्रीधने सर्वथास्वातन्त्र्यमेव॥ यथाह कात्यायनः। न भर्ता नैव च सुतो न पिता भ्रातरो न च। आदाने वा विसर्गे वा स्त्रीधने प्रभविष्णवः॥

स्वामित्वाभावादित्यभिप्रायः॥

[260.] स्त्रीधनन्त्वध्यग्न्यादिकं॥ तथाह मनुः।

Digitized by Google

अध्यग्न्यध्याहवनिकं दत्तं च प्रीतिपूर्वकं। भ्रातृमातृपितृप्राप्तं षड्विधं स्त्रीधनं स्मृतं॥

[261.] यच्च विवाहकाले ऽग्नावधिकृत्यमातुलादिभिर्दत्तं तदध्यग्नि॥

[262.] तथा च कात्यायनः। विवाहकाले यत्स्त्रीभ्यो दीयते ह्यग्निसन्निधौ। तदध्यग्निकृतं सद्भिस्स्त्रीधनं परिकीर्तितं॥ यत्पुनर्नेयते नारी नीयमाना पितुर्गृहात्। अध्याहवनिकं नाम स्त्रीधनं परिकीर्त्तितं॥ प्रीत्यादत्तं तु यत्किञ्चिच्छ्वश्र्वा वा श्वशुरेण वा। पादवन्दनिकं चैव प्रीतिदत्तं तदुच्यते॥

पादवन्दनिकं पादवन्दनावसरे दत्तं॥

[263.] भ्रातृमातृपितृप्राप्तं यदा वा कदा वा जीवनार्थमिति शेषः॥

षड्विधमिति न्यूनसंख्या व्यवच्छेदार्थं नाधिकसंख्या व्यवच्छेदाय॥

[264.] अत एवाह याज्ञवल्क्यः। पितृमातृपतिभ्रातृदत्तमध्यग्न्युपागतं। आधिवेदनिकाद्यं च स्त्रीधनं परिकीर्तितं॥

आधिवेदनिकमधिवेदननिमित्तं। अधिविन्नस्त्रियै दद्यादिति स्मृतेः।

Digitized by Google

आद्यशब्देन रिक्थक्रयसंविभागपरिग्रहाधिगमप्राप्तमेतद्धनं ॥

[265.] अपरमपि स्त्रीधनमाह स एव। बन्धुदत्तं तथा शुल्कमन्वाधेयकमेव च।

बन्धुभिः कन्याया मातृबन्धुभिः पितृबन्धुभिश्च यद्दत्तं॥

[266.] शुल्कं नाम यद्गृहीत्वा कन्या दीयते तच्छुल्कमिति विज्ञानेशः ॥

[267.] चंद्रिकाकारस्तु। गृहोपस्करवाह्यानां दोह्याभरणकर्मणां। मूल्यं लब्धं च यत्किञ्चिच्छुल्कं तत्परिकीर्तितमिति ॥

गृहोपस्करादीनां मूल्यं लब्धं कन्यागतत्वेन वरादिसकाशात् ॥ कन्यार्पणोपाधितयेति शेष इति ॥

[268.] अन्वाधेयकं नाम परिणयनादनुपश्चाद्वाहितं ॥

[269.] उक्तं च कात्यायनेन। विवाहात्परतो यच्च लब्धं भर्तृकुलात्स्त्रिया। अन्वाधेयं तु तद्द्रव्यं लब्धं पितृकुलात्तथेति ॥

स्त्रीधनं परिकीर्तितमिति संबन्धः ॥

[270.] अत्र भारुचिः। शुल्कशब्देन कन्यामूल्य-

Digitized by Google

मुच्यते ॥ तत्त्वासुरादिविवाह एवेति तत्तु निषिद्ध-मित्याह ॥

[271.] अयमभिसन्धिः । आर्षविवाहो गोमिथुनं गृहीत्वा कन्या दीयतेति । आर्षं गोमिथुनेन द्वयेन वेति विष्णुस्मरणात् ॥ तदेव कन्याया मातुस्त्रीध-नमित्यनिषिद्धता ॥ यद्वा निषिद्धमस्त्वासुरादिवि-वाहो द्रविणादानं ॥

[272.] अत्र निषिद्धत्वानिषिद्धत्वचिन्ता न प्रस्तु-ता । अपि तु विभाज्यत्वाविभाज्यत्वचिन्तेति न कश्चिद्विरोधः ॥

[273.] न भर्ता नैव च सुतो न पितेत्यादि वचनस्य फलमाह स एव । यदि ह्येकतरो ह्येषां स्त्रीधनं भक्षयेद्बलात् । सवृद्धिकं प्रदाप्यस्स्याद्दण्डं चैव समाप्नुयात् ॥ तदेव यद्यनुज्ञाप्य भक्षयेत्प्रीति-पूर्वकं । मूल्यमेव प्रदाप्यस्स्याद्यद्यसौ धनवान् भवेत् ॥

[274.] धनवान्यदि भवेदित्यभिधानान्निर्धनो मूल्य-मात्रमपि न दाप्येत्यर्थः ॥ अनुज्ञाप्य भक्षणे ऽपि मूल्यदानाभिधानात् ॥

[275.] एतदुक्तं भवति । स्त्रीधने भर्तुरस्वातन्त्र्यं । न पुनः पारतन्त्र्यमात्रं । भार्यायास्तु विवाहसंस्कृ-

ताया भर्तृधने नित्यपरतन्त्वं स्वामित्वं संपद्यते। तेन भर्तृभार्यात्वमेकविधं न भवतीत्यवगन्तव्यं॥

[276.] अत एव स्त्रीधनभोगे ऽप्यनर्हतां पत्युराह देवलः। वृत्तिराभरणं शुल्कं लाभं च स्त्रीधनं भवेत्। भोक्त्र्येतत्स्वयमेवेदं पतिर्नार्हत्यनापदि॥ वृथा मोक्षे च भोगे च स्त्रियै दद्यात्सवृद्धिकमिति॥

वृत्तिर्वर्तनार्थं पित्रादिना दत्तं। शुल्कं कथितं। लभ्यतेति लाभः॥

[277.] एतदुक्तं भवति। गौरीव्रताद्यर्थं स्त्रिया यल्लभ्यतेतदपि स्त्रीधनमिति॥ यद्वा लाभो वृद्धिः॥

[278.] पूर्वोक्तं स्त्रीधनं परिकल्पितवृद्धिमूलत्वेन व्यवह्रीयते। सा च वृद्धिर्लाभशब्देनोच्यते॥

[279.] यद्यपि प्रयुक्तधनस्वामिन एव कल्पिता वृद्धिः। तथापि धनप्रयोगे स्त्रीणामनधिकारात्पत्युरेव तदधिकारात्तदाशङ्कामाभूदित्युपदिष्टं स्वयमेवेत्येवकार अपत्यानां व्युदासार्थः॥

[280.] वृथापदं विनेत्यर्थः। मोक्षस्त्यागः॥

[281.] आपदं विनेति वदनापदि तु पतिरेव स्त्रीधनं भोक्तुमर्हति नान्य इति दर्शयति॥

[282.] आपन्नाम कुटुम्बभरणार्थद्रव्याभावः॥

[283.] तथा च याज्ञवल्क्यः। दुर्भिक्षे धर्मकार्ये च



Digitized by Google

व्याधौ संप्रतिरोधके। गृहीतं स्त्रीधनं भर्ता न स्त्रियै दातुमर्हति ॥

धर्मकार्ये नित्यनैमित्तिके च। काम्ये ऽपि क्वचिच्छान्तिके गृहयज्ञादौ ॥

[284.] प्रतिधरोके धनदानं विना निवारयितुमशक्ये धनिकाद्यासेधादाविति चंद्रिकाकारः॥ बन्धिग्रहणविग्रहादौ द्रव्यान्तराभाव इति विज्ञानेशः ॥

[285.] अत्र मनुर्विशेषमाह। यास्तासां स्युर्दुहितरस्तासामपि यथार्हतः। मातामह्याधनात्किंचित्प्रदेयं प्रीतिपूर्वकमिति ॥

यथार्हतः शीलोपयोगदारिद्र्यापेक्षयेत्यर्थः ॥

तासां भगिनीनां दुहितर इत्यर्थः ॥

[286.] ननु भगिनीदुहितॄणां भ्रातृभगिनीसद्भावे मातामहिधने स्वामित्वाभावात्किमिति किंचित्प्रदीयतेति ॥

[287.] सत्यं। प्रीतिपूर्वकमित्युक्तत्वान्न दोषः॥ यथा पैतृके धने कन्यानां दायार्हत्वाभावे ऽपि वचनबलात्पतितास्स्युरदित्सव इति निन्दास्मरणाच्च संस्कारोपयोगिप्रतिष्ठोपयोगिद्रव्यं देयमिति वचनबलात्प्रतीयते तथेहापीत्यर्थः ॥

Digitized by Google

[288.] विष्णुर्विशेषमाह। यौतकं मातुः कुमारीभाग एवेति ॥

न सहोदराणामिति शेषः ॥

[289.] यौतकमन्योन्यान्वितयोर्वधूवरयोर्देयं ॥ यद्वाऽन्नं युतयोरिति व्युत्पत्त्या यौतकं ॥

[290.] गौतमस्तु विशेषमाह। स्त्रीधनं दुहितॄणामप्रत्तानामप्रतिष्ठितानां चेति ॥

[291.] सौदायिकादिस्त्रीधनं कुमारीणामनूढानामप्रतिष्ठितानां च दुहितॄणां स्वं भवतीत्यर्थः ॥ अतश्च तद्धनं ता एव दुहितरो गृह्णीयुर्यथांशमित्यभिप्रायः ॥

[292.] इयमपरार्कमतानुसाराद्गौतमवचनव्याख्या॥ विज्ञानेश्वरमतानुसारेण तु पूर्वमेव व्याख्यातं॥

[293.] भार्याया ऊर्ध्वं कन्याभावे भर्तुर्भार्यारिक्थं भवेत् ॥

[294.] तथा च याज्ञवल्क्यः । अप्रजस्त्रीधनं भर्तुर्ब्राह्मादिषु चतुर्ष्वपि। दुहितॄणां प्रसूता चेच्छेषेषु पितृगामि तत् ॥

[295.] अस्यार्थः । अप्रजास्त्रियाः पूर्वोक्तायाः ब्राह्मदैवार्षप्राजापत्येषु चतुर्षु विवाहेषु भार्यात्वं प्राप्ताया अतीतायाः पूर्वोक्तं सौदायिकं धनं भर्तुर्भवति ।

Digitized by Google

तदभावे तत्प्रत्यासन्नानां सपिण्डानां ॥ शेषेष्वासुरगान्धर्वराक्षसपैशाचेषु विवाहेषु तदप्रजस्त्रीधनं ॥

[296.] पितृगामि माता च पिता च पितरौ तौ गच्छतीति पितृगामि ॥

[297.] एकशेषनिर्दिष्टाया अपि मातुः प्राधान्यात्प्रथमं धनग्रहणं। पितामाचेत्येकशेषे मातुरेव प्राधान्यात् ॥

[298.] तदभावे तत्प्रत्यासन्नानां धनग्रहणं ॥

[299.] सर्वेष्वेव विवाहेषु प्रसूता अपत्यवती चेद्दुहितॄणां तद्धनं भवति ॥

[300.] अच दुहितृशब्देन दुहितृदुहितर उच्यन्ते। साक्षाद्दुहितॄणां मातुर्दुहितरश्शेषमित्यचोक्तत्वात् ॥

[301.] अतश्च मातृधनं मातरि वृत्तायां प्रथमं दुहितरो गृह्णन्ति ॥ तच चोढानूढा समवाये ऽनूढा गृह्णन्ति। तदभावे परिणीता। तचापि प्रतिष्ठिताप्रतिष्ठिता समवाये ऽप्रतिष्ठिताः ॥

[302.] एतद्विज्ञानेश्वरमतं भारुच्यपरार्कचन्द्रिकाकारादयो न मन्यन्ते। विज्ञानेश्वरेण स्वमतिमाचपरिकल्पितत्वात्। अनेकाध्याहारपरिकल्पनाच्च। गौतमवचने स्त्रीधनं दुहितॄणामप्रत्तानामप्रतिष्ठितानां चेति सामान्येनाभिधानाच्चेति ॥

Digitized by Google

[303.] एतच्च शुल्कव्यतिरेकेण ॥ शुल्कं तु सोदर्याणामेव। भगिनीशुल्कं सोदर्याणामूर्ध्वं मातुरिति गौतमवचनात् ॥

मातुरूर्ध्वमित्यन्वयः ॥

[304.] सर्वासां दुहितृणामभावे दुहितृदुहितरो गृह्णन्ति। दुहितृणां प्रसूता चेदित्यस्माद्वचनात् ॥

[305.] तासां भिन्नमातृकाणां विषमाणां समवाये मातृद्वारेण भागकल्पना। प्रतिमातृस्वभाव इति गौतमस्मरणात् ॥

स्वभावस्स्वत्वं ॥

प्रतिमातृ मातरं मातरं। स्वस्य मातृस्वत्वानुसारि तासां स्वत्वमित्यर्थः ॥

[306.] अनपत्यहीनजातिस्त्रीधनं तु भिन्नोदराप्युत्तमजातिसपत्नीदुहिता गृह्णाति। तदभावे तदपत्यं ॥

[307.] तथा च मनुः। स्त्रियास्तु यद्भवेद्वित्तं पित्रा दत्तं कथञ्चन। ब्राह्मणी तद्धरेत्कन्या तदपत्यस्य वा भवेदिति ॥

[308.] ब्राह्मणीग्रहणमुत्तमजात्युपलक्षणमिति विज्ञानेशः ॥ अतश्चानपत्यवैश्याधनं क्षत्रिया कन्या गृह्णाति ॥ दुहितृणां पुत्राणां पौत्राणां च मातृधनसंबन्धात् ॥

Digitized by Google

[309.] तथा च मनुः । जनन्यां संस्थितायां तु समं सर्वे सहोदराः । भजेरन्मातृकं रिक्थं भगिन्यश्च सनाभय इति ॥

[310.] मातृकं रिक्थं सर्वे सहोदरास्समं भजेरन् । सनाभयो भगिन्यश्च समं भजेरन्निति संबन्धः । न पुनस्सहोदरा भगिन्यश्च संभूय समं भजेरन्निति संबन्धः । पूर्वोक्तक्रमप्रतिपादकवचनविरोधात् । विभागकर्तृत्वान्वयेनापि च शब्दोपपत्तेश्च । यथा देवदत्तः परंतु यज्ञदत्तश्चेति ॥

समग्रहणमुद्धारनिवृत्त्यर्थं ॥

सोदरग्रहणं भिन्नोदरनिवृत्त्यर्थं ॥

[311.] अत एव विष्णुः । भगिनीशुल्कं मातुस्सोदराणामेवेति ॥

अयमर्थः । भगिनीशुल्कात्मकं स्त्रीधनं मातुरेव । मातुरभावे सोदराणामेव ॥

न भिन्नोदराणामित्यर्थः ॥

[312.] यत्तु गौतमसूत्रं । भगिनीशुल्कं सोदराणामूर्ध्वं मातुरिति ॥ मातुरूर्ध्वं सोदराणामित्यन्वयपरं ॥

[313.] यथाह बोधायनः । स्त्रीधनं मातृगामि । तदभावे सोदरभ्रातृगामीति ॥

स्त्रीधनं कन्याशुल्कं ॥

Digitized by Google

[314.] अतश्च कन्याशुल्कविषये सोदरासोदरविभागे ऽसोदराणामपि किञ्चिद्देयमित्यसहायव्याख्यानमसहायं। भगिनीशुल्कं तु सोदराणामूर्ध्वं मातुरित्यादिस्मृतिषु भगिनीशुल्करूपे सर्वस्मिन्धने सोदराणामेव स्वाम्यप्रतिपादनात्॥

[315.] पुत्राणामभावे पौत्राः पैतामहधनहारिण इति वचोभंग्याह गौतमः। ऋणप्रदातारश्च रिक्थभाज ऋणं प्रतिकुर्युरिति॥ पुत्रपौत्रै ऋणं देयमिति पौत्राणामपि पितामहर्णापाकरणे ऽधिकारात्॥

[316.] नन्वेवं मातामह्यां वृत्तायां तदौर्ध्वदैहिके पुत्रस्यैवाधिकारात्पुत्रपौत्रद्रव्यसमुदायेनैवौर्ध्वदैहिकक्रियाः कार्या इति विष्णुवचनविरोधः स्यादिति चेन्नैवं॥ षोडशश्राद्धेष्वेव पुत्रपौत्रधनसंसर्गः। तत्प्रेतत्वविमुक्तेरुभयाकाङ्क्षितत्वादिति भारुचिना विषयव्यवस्थायाः कृतत्वात्॥

[317.] पौत्राणामप्यभावे तद्विभागक्रममाह याज्ञवल्क्यः। अतीतायामप्रजसिबान्धवास्तदवाप्नुयुः॥

[318.] अस्यार्थः। तत्पूर्वोक्तं स्त्रीधनमप्रजस्यनपत्यायां दुहितृपुत्रपौत्ररहितायां स्त्रियामतीतायां बान्धवा भर्त्रादयो गृह्णन्तीति॥

Digitized by Google

[319.] यथाह मनुः। ब्राह्मदैवार्षगान्धर्वप्राजापत्येषु यद्धनं। अतीतायामप्रजसि पत्युरेव तदिष्यतेति॥

[320.] यत्तु कात्यायनेनोक्तं। बन्धुदत्तं तु बन्धूनामभावे भर्तृगामि तत्। तदप्युक्तपञ्चविधेतरविवाहसंस्कृतस्त्रीधनविषयं। अन्यथा शुल्कं शुल्कदातुरेव स्यात्। भगिनीशुल्कं सोदराणामूर्ध्वं मातुरिति गौतमवचनविरोधस्स्यात्॥

[321.] शुल्काख्यस्त्रीधनस्य दातारो वरादयः। तेषां दातृत्वे ऽपि तद्धनं न भवति। किन्तु धनस्वामिनां सोदर्यभ्रातॄणां। तेषां तन्मातुरभावे भवतीत्यर्थः॥

[322.] अत एव भगिनीशुल्कं नामार्षविवाहे गोमिथुनमेव। नासुरादिविवाहे। तत्र तु तद्दातुरेव तद्धनविधानात्॥

[323.] यत्तु भारुचिव्याख्यानं तत्प्रौढवादमात्रमित्यनुसन्धेयं॥

[324.] यत्तु वैवाहिकं शुल्कं प्रकृत्य शंखेनोक्तं। स्वं च शुल्कं वोढेति॥ वोढा वरः। स्वं स्वयमेव शुल्कं गृह्णीयादिति। तदपरिसमाप्ते विवाहे द्रष्टव्यं॥

[325.] विवाहपरिसमाप्तिः विवाहप्रधानहोमपरिसमाप्तिः॥

Digitized by Google

[326.] अनेनैवाभिप्रायेण याज्ञवल्क्येनाप्युक्तं । मृतायां दत्तमादद्यादिति ॥

शुल्कमलंकारादिकं वादद्याद्वोढेति शेषः ॥

वाग्दत्ताया संस्कारात्प्राङ्म्रियेत तद्विषयं वचनमित्याह ॥

[327.] गौणमातृपरिगणनापूर्वकं तद्धनहर्तृनाह बृहस्पतिः । मातृष्वसा मातुलानी पितृव्यस्त्री पितृष्वसा । श्वश्रूः पूर्वजपत्नी च मातृतुल्याः प्रकीर्तिताः ॥ यदा सामौरसो न स्यात्सुतो दौहित्र एव हि । तत्सुतो वा धनं तासां स्वस्रीयाद्यास्समाप्नुयुरिति ॥

[328.] स्वस्रीयो धनस्वामिनो भागिनेयः । स च स्वमातृष्वसुर्धनमाप्नुयात् । एवमाद्यशब्दपरिगृहीता यथाक्रमं स्वकीयमातृतुल्याया धनं समाप्नुयुः ॥ एवमेव सपत्नीसंतानो ऽप्युपमातृधनं तत्संतान तद्भ्राताद्यभावे समाप्नुयात् ॥

[329.] आधिवेदनिके स्त्रीधने विशेषमाह याज्ञवल्क्यः । अधिविन्नस्त्रियै दद्यादाधिवेदनिकं समं । न दत्तं स्त्रीधनं यस्यै दत्ते त्वर्धं प्रकीर्तितं ॥

[330.] यस्या उपरि विवाहान्तरं साधिविन्नास्त्री ॥

[331.] तस्यायधिविन्नस्त्रियायाधिवेदनिकमधि-



Digitized by Google

वेदननिमित्तं धनमधिवेदनप्रयोजनकं प्रयोजनमिति ठक्॥ यावदधिवेदनार्थं व्ययीकृतं तावद्दद्यात्॥ यस्यै भर्त्रा श्वशुरेण वा स्त्रीधनं न दत्तं स्यात्। दत्ते स्त्रीधनयाधिवेदनिकद्रव्यस्यार्धं दद्यात्। यावत्तावत्पूर्वदत्तमधिवेदनिकं समं भवति तावद्देयमित्यर्थः॥

[332.] अतस्स्त्रीधनस्य दुहित्रादिसंबन्धः प्रत्यासत्तितारतम्यन्यायनिबन्धनो। न तु वाचनिकः॥ प्रत्यासत्तितारतम्यं च। पुमान्पुंसो ऽधिके शुक्रे स्त्री भवत्यधिके स्त्रिया इति विज्ञानेश्वरप्रतिपादितमित्युक्तं प्राक्॥

[स्त्रीधनं दायविधं]

[333.] अत्र विवदन्ते वृद्धाः। स्त्रीधनं दायशब्दवाच्यं न वेति॥

[334.] तस्मात्स्त्रियो निरिन्द्रिया अदायादीरिति श्रुतेः। स्त्रीणां दायानर्हत्वात्। स्त्रीधनविभागो न दायधनविभागः। किन्तु तद्धनविभाग इति व्यवहारः॥

[335.] यत्तूक्तं संग्रहकारेण। पितृद्वारागतं द्रव्यं मातृद्वारागतं च यत्। कथितं दायशब्देन तद्विभागो ऽधुनोच्यतेति॥ तन्नु यथा पितृद्वारागतं द्रव्यं दायशब्देन कथितं दायशब्दवाच्यं। तद्वन्मातृद्वारा-

Digitized by Google

गतमपि दायशब्दवाच्यं॥ अतश्चैकशब्दस्यार्थद्वयांगीकारे शक्तिगौरवं स्यादिति। अन्यत्र वृत्त्यन्तरं स्वीकार्यं॥ अतश्च मातृद्वारागतं द्रव्यं दीयते ददातीति व्युत्पत्त्या गौणवृत्त्या दायशब्दार्थ इत्याहुः भारुच्यपरार्कसोमेश्वराचार्यप्रभृतयः॥

[336.] विज्ञानेश्वरासहायमेधातिथिप्रभृतयस्तु तस्मात्स्त्रियो निरिन्द्रिया इत्यादिश्रुतेर्निरिन्द्रियश्रवणमत्यन्तनिरिन्द्रियविषयं न भवत्यपि त्वल्पेन्द्रियपरं॥ पुमान् पुंसोऽधिके शुक्रे स्त्री भवत्यधिके स्त्रिया इत्यत्राधिक्याल्पत्वप्रतीतेर्न केवलमत्यन्तनिरिन्द्रियत्वं स्त्रीणामिति दायार्हत्वं स्त्रीणामप्यस्ति। किन्तु पितृपुत्रविभागे पुत्राणां प्राधान्यात्। तत्रैव स्त्रीणां दायानर्हत्वात्। यत्किञ्चित्प्रीतिदानार्हत्वमपि स्त्रीणामप्यस्तीत्येवं पराश्रुतिः॥ अत एव संग्रहकारवचनं पितृद्वारागतं द्रव्यं मातृद्वारागतं द्रव्यं चोभयं दायशब्दवाच्यमिति स्वरसोर्थः संपद्यतेति॥

[337.] गतमपि स्पष्टार्थं पुनरुक्तं॥

[द्व्यामुष्यायणः]

[338.] अथ द्व्यामुष्यायणस्य विभागे विशेषः कथ्यते॥

Digitized by Google

[339.] तस्य स्वरूपमाह याज्ञवल्क्यः । अपुत्रेण परक्षेत्रे नियोगोत्पादितस्सुतः । उभयोरप्यसौ रिक्थी पिण्डदाता च धर्मत इति ॥

[340.] अतश्च द्विपितृको ह्यामुष्यायणः । द्वयोरपि रिक्थहारी पिण्डदाता च ॥

[341.] परक्षेत्र इत्यस्यार्थः । परस्य क्षेत्रं भार्या । तस्याः परक्षेत्रत्वं वाग्दानमात्रेण । न तु परिणयनेन । परिणीतपरक्षेत्रे नियोगस्य निषिद्धत्वात् ॥

[342.] तथाह मनुः । देवराद्वा सपिण्डाद्वा स्त्रिया सम्यङ्नियुक्तया । प्रजेप्सिताधिगन्तव्या संतानस्य परिक्षये ॥ विधवायां नियुक्तस्तु घृताक्तो वाग्यतो निशि । एकमुत्पादयेत्पुत्रं न द्वितीयं कथञ्चनेति ॥

[343.] एवं नियोगमुपन्यस्य स्वयमेव निषेधति । नान्यस्मिन्विधवानारी नियोक्तव्या द्विजातिभिः । अन्यस्मिन्विनियुञ्जाना धर्मं हन्युस्सनातनं ॥ नोद्वाहिकेषु मन्त्रेषु नियोगः कीर्त्यते क्वचित् । न विवाहविधावुक्तं विधवावेदनं पुनः ॥ अयं द्विजैर्हि विद्वद्भिः पशुधर्मो विगर्हितः । मनुष्याणामपि प्रोक्तो वेने राज्यं प्रशासति ॥ स महीमखिलां भुञ्जन् राजर्षिः प्रवरः पुरा । वर्णानां संकरञ्चक्रे कामोपहतचेतसां ॥

Digitized by Google

ततः प्रभृति यो मोहात्प्रमीतपतिकां स्त्रियं। नियोजयत्यपत्यार्थे गर्हन्ते तं हि साधव इति॥

[344.] न च विहितप्रतिषिद्धत्वाद्विकल्पः। नियोक्तॄणां निन्दाश्रवणात्। स्त्रीधर्मेषु व्यभिचारस्य बहुदोषश्रवणाच्च। संयमस्य प्रशस्तत्वाच्च॥

[345.] यथाह मनुरेव। कामं तु क्षपयेद्देहं पुष्पमूलफलाशनैः। न तु नामापि गृह्णीयात्पत्यौ प्रेते परस्य त्विति॥

अपत्यलोभाद्या तु स्त्री भर्तारमतिवर्त्तते। सेह निन्दामवाप्नोति परलोकाच्च हीयतेति॥

[346.] पुत्रार्थं पुरुषान्तराश्रयणं निषेधति॥ तस्माद्विहितप्रतिषिद्धत्वाद्विकल्प इति वक्तुमयुक्तं॥

[347.] न चापत्यलोभाद्या तु स्त्रीति सति भर्तरि वाच्यं। मृते भर्तरि स्रोयेत शय्यां वा परिपालयेदिति विष्णुवचनात्॥

[348.] अत्र मृते भर्तरि जीवति यदा तत्परायणा भर्त्रैकपरतन्त्रा स्त्री धर्मोक्तप्रकारेण मृते भर्तरि तत्परायणा स्त्री धर्माव्युदासार्थं शय्यां वा परिपालयेदित्युक्तं। तत्प्रकार उपलक्ष्यते॥

[349.] अतो वाग्दत्ताविषयमिति विज्ञानेशः॥

[350.] भारुच्यादयस्तु न सहन्ते॥

Digitized by Google

[351.] अपत्यलोभाद्या तु स्त्री भर्तारमतिवर्त्ततेत्यादिवचनं जीवद्भर्तृकाविषयं ॥ नान्यस्मिन्विधवानारी नियोक्तव्या द्विजातिभिरिति सार्थवादकवचनं। देवरादिव्यतिरिक्तान्यतरस्मिन्नियोगविषयं॥ नियोक्तृनिन्दाश्रवणं देवरादिव्यतिरिक्तेषु ये नियोक्तारस्तद्विषयं ॥ स्त्रीणां व्यभिचारस्य बहुदोषश्रवणं नियोगव्यतिरिक्तव्यभिचारविषयं ॥ अतश्च । अयं द्विजैर्हि विद्वद्भिः पशुधर्मो विगर्हित इति पशुधर्मदृष्टान्तोक्तिरैच्छिको व्यभिचारो देवरादिव्यतिरिक्तनियोगश्च निषिध्यते ॥ देवरादिव्यतिरिक्तनियोगस्य पशुधर्मतुल्यत्वात् ॥ अतश्च शय्यापालनपुत्रोत्पादनयोर्विकल्पः। किन्तु पुत्रवत्याः शय्यापालनं दुहितृमत्या वा। तदभावे नियोगादप्यपत्योत्पादनमावश्यकं। प्रजेप्सिताधिगन्तव्या सन्तानस्य परिक्षय इति वचनात् ॥ शय्यापालनात्सन्ताननिर्वाह एव श्रेयानिति भारुच्यपरार्कसोमेश्वरादीनां मतं ॥

[352.] एतन्नियोजनं कलियुगे निषिद्धमपि युगान्तराभिप्रायेणोक्तं ॥

[353.] अत्र याज्ञवल्क्यः। यस्या म्रीयेत कन्याया वाचासत्ये कृते पतिः। तामनेन विधानेन निजो

विन्देत देवरः॥ यथाविध्यभिगम्यैनां शुक्लवस्त्रां शुचि-
स्मितां। मिथो भजेताप्रसवात्सकृत्सकृदृतावृतौ॥

[354.] यस्मै वाग्दत्ताकन्या सप्रतिग्रहमाचेणै-
वास्याः पतिरित्यस्मादेव वचनादवगम्यते॥

[355.] तस्मिन्मृते देवरस्तस्य ज्येष्ठः कनिष्ठो वा
निजस्सोदरो विन्देत परिणयेत्। यथाविधिशास्त्रमन-
तिक्रम्यपरिणीयानेन विधानेन घृताभ्यङ्गवाङ्नियमा-
दिना शुक्लवस्त्रां शुचिव्रतां मनोवाक्कायसंयतां मि-
थो रहस्यागर्भग्रहणात्सकृत्सकृदृतावृतावेकैकं वारं
गच्छेत्॥

[356.] अयं च वाचनिको विवाहः। नियुक्ता-
भिगमनाङ्गं घृताभ्यङ्गादिवदिति मन्तव्यं॥

[357.] अतो न देवरस्य भार्यात्वमापादयति॥
अतस्तदुत्पन्नमपत्यं क्षेत्रस्वामिन एव भवति। न
देवरस्य॥ संविदस्ति चेदुभयोरपि॥

[358.] एतच्च वाग्दत्ताविषयकनियोजनं विज्ञा-
नयोगिमतानुसारेणोक्तं॥ भारूच्यादीनां तु मते
विधवानियोजनमप्यस्ति। वाग्दत्तानियोजनमप्यस्ती-
ति ऽध्येयं॥

Digitized by Google

[द्वादशमुख्यगौणपुत्राः]

[359.] मुख्यगौणपुत्राणां स्वरूपमाह याज्ञवल्क्यः। औरसो धर्मपत्नीजस्तत्समः पुत्रिकासुतः । क्षेत्रजः क्षेत्रजातस्तु सगोत्रेणेतरेण वा॥ गृहे प्रच्छन्न उत्पन्नो गूढजस्तु सुतस्स्मृतः। कानीनः कन्यकाजातो मातामहसुतो मतः॥ अक्षतायां क्षतायां वा जातः पौनर्भवस्तुतः। दद्यान्माता पितावायं स पुत्रो दत्तको भवेत्॥ क्रीतश्च ताभ्यां विक्रीतः कृत्रिमस्स्यात्स्वयंकृतः। दत्तात्मा तु स्वयंदत्तो गर्भे विन्नस्सहोढजः॥ उत्सृष्टो गृह्यते यस्तु सो ऽपविद्धो भवेत्सुतः॥

[360.] उरसोजात औरसः। स च धर्मपत्नीजः पुत्रो मुख्यः॥

[361.] तत्सम औरससमः पुत्रिकासुतः॥ अभ्रातृकां प्रदास्यामि तुभ्यं कन्यामलंकृतां। अस्यां यो जायते पुत्रस्स मे पुत्रो भवेदिति वसिष्ठवचनात्॥

[362.] पुत्रिकासुत इत्यत्र पुत्रिकायास्सुत इति षष्ठीसमासो गम्यते॥ पुत्रिकैव सुतः पुत्रिकासुत इति कर्मधारयो ऽपि विवक्षितः॥ यथाह गौतमः। तृतीयः पुत्रिकैवेति॥ तृतीयः पुत्रः पुत्रिकैवेत्यर्थः॥

Digitized by Google

[363.] क्षेत्रजः क्षेत्रजातः नियोगादुत्पन्नस्सगोत्रेणेतरेण वेत्युत्तरेणान्वयः ॥

इतरेणासपिण्डेन देवरेण वा ॥

[364.] गूढजा गूढोत्पन्नः पितृगृहे प्रच्छन्न उत्पन्न इत्यर्थः ॥ सवर्णजत्वनिश्चये सतीति शेषः ॥

[365.] एवं कानीनादावप्यूह्यं ॥

[366.] मातापितापि दद्यातां यमद्भिः पुत्रमापदि । सदृशं प्रीतिसंयुक्तं स ज्ञेयो दत्तिमस्सुत इति ॥

[367.] आपद्ग्रहणादनापदि न देयः । दातुरयं प्रतिषेधः ॥

[368.] तथा एकपुत्रो न देयः । न त्वेकं पुत्रं दद्यात्प्रतिगृह्णीयाद्वेति वसिष्ठस्मरणात् ॥

[369.] अनेकसद्भावे ऽपि ज्येष्ठो न देयः । ज्येष्ठेन जातमात्रेण पुत्रीभवति मानव इति तस्यैव पुत्रकार्यकरणे मुख्यत्वात् ॥

[370.] पुत्रप्रतिग्रहप्रकारमाह वसिष्ठः । पुत्रं प्रतिग्रहिष्यन् बन्धूनाहूय राजनि चावेद्य स्वनिवेशनस्य मध्ये व्याहृतिभिर्हुत्वादूरबान्धवमसन्निकृष्टं गृह्णीयादिति ॥

अदूरबान्धवमित्यनेनात्यन्तदेशभाषाविप्रकृष्टस्य प्रतिषेधः । असन्निकृष्टमित्यनेन ज्ञातिनिषेधः ॥



Digitized by Google

[371.] क्रीतस्तु पुत्रस्ताभ्यां मातापितृभ्यां मात्रा पित्रा वा विक्रीतः ॥ पूर्ववदेकं पुत्रं ज्येष्ठं च वर्जयित्वापदि सवर्ण इत्येव ॥

[372.] यत्तु मनुनोक्तं । क्रीणीयाद्यस्त्वपत्यार्थं मातापित्रोर्यमन्तिकात् । स क्रीतकस्सुतस्तस्य सदृशो ऽसदृशो ऽपि वेति ॥ तद्गुणैस्सदृशो ऽसदृशो व्याख्येयं । न जात्या । सजातीयेष्वयं प्रोक्त इत्युपसंहारात् ॥

[373.] कृत्रिमस्स्यात्स्वयंकृतः । कृत्रिमस्तु पुत्रस्स्वयं पुत्रार्थिना धनक्षेत्रादिप्रदर्शनादिप्रलोभनैः पुत्रीकृतो मातापितृविहीनः । तत्सद्भावे तत्परतन्त्रत्वात् ॥

[374.] दत्तात्मा तु पुत्रो यो मातापितृविहीनस्ताभ्यां त्यक्तो वा तवाहं पुत्रो भवामीति स्वयं दत्त उपनीतः ॥

## [पूर्वोक्तपुत्राणां विभागः]

[375.] तेषां विभागप्रकारमाह याज्ञवल्क्यः । पिण्डदो ऽंशहरश्चैषां पूर्वाभावे परःपरः । एषां पूर्वोक्तानां पुत्राणां द्वादशानां पूर्वस्य पूर्वस्याभाव उत्तरोत्तरः पिण्डदः श्राद्धदो ऽंशहरो धनहरो वेदितव्यः ॥

[376.] औरसपुत्रिकासमवाययौरस्य धनग्रहणे

Digitized by Google

प्राप्ते मनुरपवादमाह। पुत्रिकायां कृतायां तु यदि पुत्रो ऽनुजायते। समस्तत्र विभागस्स्याज्ज्येष्ठता नास्ति हि स्त्रिया इति॥

[377.] तथान्येषामपि पूर्वस्मिं सत्युत्तरेषां पुत्राणां चतुर्थांशभागित्वमुक्तं वसिष्ठेन। तस्मिंश्चेत्प्रतिगृहीत औरस उत्पद्यते चतुर्थांशभागी स्याद्दत्तक इति॥

[378.] दत्तकग्रहणं क्रीतकृत्रिमादीनां प्रदर्शनार्थं। पुत्रीकरणाविशेषात्॥

[379.] तथा च कात्यायनः। उत्पन्ने त्वौरसे पुत्रे चतुर्थांशहरास्सुताः। सवर्णा असवर्णास्तु ग्रासाच्छादनभाजना इति॥

सवर्णाः क्षेत्रजदत्तकादयः। त औरसे सति चतुर्थांशहराः॥

चतुर्थांशो नाम चतुर्थस्य यो ऽंशस्समत्वेन परिकल्प्यते तत्तुल्यांशः पञ्चमांश इत्यर्थः। पञ्चमांशहरा दत्तकृत्रिमादिसुताः पुनरिति स्मृतेः॥ पुनरिति पश्चादुत्पन्न औरस इत्यर्थः॥

असवर्णाः कानीनगूढोत्पन्नसहोढपौनर्भवाः॥ तेषां यद्यपि सवर्णत्वादिनिश्चये कानीनत्वादिव्यपदेशः। तथापि सन्दिग्धेऽपि सवर्णत्व असवर्ण इति व्यपदेशः॥

Digitized by Google

[380.] यदपि मनुनोक्तं । एक एवौरसः पुत्रः पित्र्यस्य वसुनः प्रभुः । शेषाणामानृशंस्यार्थं प्रदद्यात्तु प्रजीवनमिति ॥

[381.] तदपि दत्तकादीनामौरसप्रतिकूलत्वे निर्गुणत्वे च वेदितव्यमिति विज्ञानेशः ॥

[382.] सोमेश्वरस्तु दत्तादिव्यतिरिक्तानां कानीनगूढोत्पन्नसहोढपौनर्भवानामेव प्रजीवनदानमिति शेषशब्दार्थं इत्याह ॥

[383.] भारुचिस्तु एक एवौरसः पुत्र इत्यादि वचनं एकपुत्रविषये दत्तादेस्स्वीकारोऽस्ति ॥ तथा च दत्तपुत्रादिस्वीकारात्पूर्वं स्थितस्य पुत्रस्य दत्तादीनां प्रजीवनप्रदानं नान्येषामित्याह ॥

[384.] अयमेव पक्षः श्रेयान् ॥

[385.] क्षेत्रजस्य विशेषो दर्शितो मनुना । षष्ठं तु क्षेत्रजस्यांशं प्रदद्यात्पैतृकाद्धनात् । औरसो विभजन्दायं पित्र्यं पञ्चममेववेति ॥

[386.] द्वादशविधपुत्राणां मध्ये षण्णामेव दायभाक्त्वं । औरसः क्षेत्रजश्चैव पुत्री दत्तक एव च । गूढोत्पन्नोऽपविद्धश्च दायादा बान्धवाश्च षट् ॥ कानीनश्च सहोढश्च क्रीतः पौनर्भवस्तथा । स्वयंदत्तश्च शौद्रश्च षड्दायादबान्धवाः ॥

Digitized by Google

[387.] उभयविधषट्कस्य बान्धवत्वं समानं ॥ अतश्च समानगोत्रत्वेन च सपिण्डत्वेन चोदकप्रदानाधिकारित्वं वर्गद्वयस्यापि समानमेव । किन्तु स्वपितृसमानोदकपिण्डानां सन्निहितरिक्थहरान्तराभावे पूर्वषट्कस्यैव तद्रिक्थहरत्वं नेतरषट्कस्येति ऽध्येयं ॥

[388.] नन्वेवं गोत्ररिक्थे जनयितुर्न भजेद्दत्रिमस्सुतः । गोत्ररिक्थानुगः पिण्डो व्यपैति ददतस्स्वधा इति मनुवचनाद्दत्रिमस्य स्वजनकगोत्रसापिण्ड्ययोर्निवृत्तौ कथं दत्त्रिमो ऽपि स्वजनयितुस्स्वधां कुर्यादिति विष्णुवचनमिति चेत् ॥ उच्यते । तत्तु दत्त्रिमजनकस्य संतत्यभावे वेदितव्यं ॥ उपरिष्टात्प्रपंच्यते ॥

[389.] अतश्चौरसव्यतिरिक्तानां पुत्रप्रतिनिधीनां सर्वेषां रिक्थहारित्वं पूर्वस्य पूर्वस्याभावे ऽविशिष्टं ॥ औरसस्य तु । एक एवौरसः पुत्रः पित्र्यस्य वसुनः प्रभुरित्यनेनैव रिक्थभाक्त्वमुक्तं ॥

[390.] यत्तु भ्रातॄणामेकजातानामेकश्चेत्पुत्रवान् भवेत् । सर्वांस्तांस्तेन पुत्रेण पुत्रिणो मनुरब्रवीदिति तदपि भ्रातृपुत्रस्य पुत्रीकरणसंभवे ऽन्येषां पुत्रीकरणनिषेधार्थं । न पुनः पुत्रत्वप्रतिपादनाय । तत्सुतो गोत्रजो बन्धुरित्यनेन विरोधात् ॥

[391.] चंद्रिकाकारस्तु प्रशंसार्थपरं वचनमित्याह ॥

Digitized by Google

[392.] धारेश्वरदेवस्वामिनौ तु विज्ञानयोगिमतानुवर्त्तिनावेव ॥ यथोक्तं देवस्वामिना । उभयत्रापि नान्यः प्रतिनिधिः कार्य इति ॥ अस्यार्थः । उभयत्रापि यद्येकपुत्रा बहवः भ्रातॄणामेकजातानामिति वचनद्वये । भ्रातृसुते पुत्रप्रतिनिधितया कथञ्चित्कर्तुं शक्ये सति । तदन्यो न प्रतिनिधिः कार्य इति ॥

[393.] अनुलोमजानां तु मूर्धावसिक्तादीनामौरसे ऽप्यन्तर्भावात्तेषामप्यभावे क्षेत्रजादीनां दायहरत्वं बोद्धव्यं ॥

[394.] शूद्रापुत्रस्त्वौरसो ऽपि कृत्स्नं भागमन्याभावे ऽपि न लभते ॥ यथाह मनुः । यद्यपि स्यात्तु सत्पुत्रो यद्यपुत्रो ऽपि वा भवेत् । नाधिकं दशमाद्दद्याच्छूद्रापुत्राय धर्मत इति ॥

सत्पुत्रो विद्यमान द्विजातिपुत्रः तदन्यो ऽपुत्रः ॥

[395.] शूद्रधनविभागे विशेषमाह याज्ञवल्क्यः । जातो ऽपि दास्यां शूद्रेण कामतो ऽंशहरस्स्मृतः । मृते पितरि कुर्युस्तं भ्रातरस्त्वर्धभागिनं ॥ अभ्रातृको हरेत्सर्वं दुहितॄणां सुतादृते ॥

[396.] दुहितृसुतसद्भावे ऽप्यर्धभागिक एव दासीपुत्र इत्यर्थः ॥

Digitized by Google

[397.] अत्र शूद्रग्रहणाच्चैवर्णिकस्य दास्यामुत्पन्नः पितुरिच्छया ऽप्यंशं न लभते। नाप्यर्धं। कृत्स्नं दूरत एव। किन्तु जीवनमात्रं लभते॥

[398.] इत्यप्रतिबन्धदायविभागप्रकरणं॥

[विभक्तापुत्रमृतधनविभागः]

[399.] अथ विभक्तस्यापुत्रस्य स्वर्यातस्यासंसृष्टिनो धनं को गृह्णीयादित्यत्राह याज्ञवल्क्यः। पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा। तत्सुतो गोत्रजो बन्धुश्शिष्यस्सब्रह्मचारिणः॥ एषामभावे पूर्वस्य धनभागुत्तरोत्तरः। स्वर्यातस्य ह्यपुत्रस्य सर्ववर्णेष्वयं विधिरिति॥

[स्वत्वस्वरूपं]

[400.] अयं च पत्न्यादिषु स्वामितासंक्रमक्रमः प्रत्यासत्तितारतम्य रूपन्यायनिबन्धनो ऽवाचनिकः। स्वस्वामिसंबन्धस्य वाचनिकत्वाभावात्॥

[401.] तथा हि। स्वत्वं लौकिकं। लौकिकक्रियाजन्यत्वात् व्रीह्यादिवत्॥

[402.] यूपाहवनीयाचार्यकादीनान्त्वलौकिकानां न लौकिकतक्षणादिक्रियामात्रजन्यता। किन्तु मन्त्रादिनियमोपेततक्षणादिजन्यतेति न व्यभिचारः॥

Digitized by Google

[403.] यत्तु वैददानप्रतियोगिनिप्रतिग्रहे मन्त्र-
नियमः सदानापूर्वोत्पत्त्यर्थो । न स्वत्वोत्पत्त्यर्थः ।
अवैददानप्रतियोगिन्यमन्त्रके प्रतिग्रहे स्वत्वोत्पत्ति-
दर्शनादिति प्रपञ्चितं लीप्सासूत्रे ॥

[404.] यत्तु विज्ञानयोगिना स्वत्वं लौकिकं लौ-
किकक्रियासाधनत्वात् व्रीह्यादिवदित्युक्तं तदुग्रन्थः
स्थूलमिव प्रतिभाति ॥ लीप्सासूत्रे हि गुरुणा लौ-
किकक्रियासाध्यत्वेनैव स्वत्वस्य लौकिकत्वमुक्तं । य-
थेष्टविनियोगार्हत्वं स्वत्वमिति स्वत्वलक्षणमुक्त्वा अर्ज-
नात्स्वत्वं नाम कश्चन संबन्ध इत्यनेन ग्रन्थेन ॥

[405.] अस्यार्थः । अर्जनं कर्तृकर्मणोस्संबन्धकरं ।
सकर्मकत्वात् ॥ न च ग्रामं त्यजतीत्यादौ व्यभिचार
इति वाच्यं । न ह्यत्र पारमार्थिकस्संयोगादिस्सं-
बन्धस्साध्यते । किन्तु कर्तृकर्मगतः कश्चिदतिशयो
ऽर्जनजन्मा साध्यते ॥ स चौदासीन्यप्रच्युतिरूपत्वा-
त्संबन्ध इति गीयते ॥ ग्रामं त्यजतीत्यादावपि ग्रा-
मगतो ऽतिशयो विभागरूपः क्रियागर्भो ऽस्त्येव ॥

[406.] न च प्रतिग्रहादिजन्यो हस्तसंयोगादिरे-
वातिशयो ऽस्त्विति वाच्यं। व्यभिचारात् । जन्मादौ
तदसंभवात् ॥

[407.] न चाकर्मकत्वाज्जनिक्रियाया न कर्मग-

Digitized by Google

तातिशयजनकत्वमिति वाच्यं । अर्जयतिशब्दवा-
च्यत्वदशायां सकर्मकत्वात् ॥

[408.] अयं भावः । जनिधातुः कर्तृगतक्रियार्थः स्यात् । प्रागसतः क्रियाश्रयत्वायोगात् । लब्धसत्ताकस्य पुनर्जननाभावात् । अतो जनयितृक्रियायोगं जन्यस्य स्वातन्त्र्यविवक्षया जनिधातुराहेति गुरुमततत्त्वं ॥

[409.] यथैकमेव ज्ञानं घटो भातीत्यत्राकर्मकं घटं जानीहीत्यत्र सकर्मकं ॥

[410.] गुरुमते वित्तिभात्योरभेदः ॥ यथोक्तं गुरुणा धीरेव हि भानमिति ॥

[411.] स चार्जनजन्योऽतिशयः स्वत्वमित्युच्यत इति मीमांसारहस्यं ॥ अतश्चोऽन्यथता स्फुटैव ॥

[412.] स्थूलत्वं च धनलाभशिष्योपास्त्यादिसाधन आचार्यकनियोगे । पशुवृष्ट्यादिसाधने चित्रकारीर्यादिनियोगे च व्यभिचारात् ॥

[413.] न च यथाहवनीये लौकिकज्वलनरूपेण लौकिकपाकसाधनता । न त्वलौकिकसंस्कारनिचययुक्तरूपेणेत्यनैकान्तिकता परिहारस्सुवचनः । तथा पूर्वेऽप्यनैकान्तिकता परिहारस्सुवचन इति वाच्यं ।

तस्मिं सर्वात्मनैवालौकिक अपूर्वे लौकिकालौकिक-रूपभेदकल्पनस्याशक्यत्वात् ॥

[414.] यत्तून्नीतं चित्रापूर्वकार्यतया शास्त्रैकसमधिगम्यं ॥ न च तद्रूपेण पश्वादिसाधनं । अपि तु कृतं सत्सिद्धतया ॥ न च तद्रूपं शास्त्रैकसमधिगम्यं । कार्यकारणानुमानसंवेद्यत्वात् ॥ अतो यूपाहवनीयादितुल्यतया नानैकान्तिकता प्रतिपादयितुं शक्यत इति ॥

[415.] तदसत् । यूपाहवनीयादौ लौकिके रूपे नियमवैयर्थ्यादलौकिकत्वमपि कल्पयितुं शक्यते ॥ सर्वात्मनैवालौकिके रूपे मध्ये लौकिकत्वरूपकल्पना हेत्वभावान्न शक्येति ॥

[416.] उत्पन्नस्यापूर्वस्य कार्यकारणानुमानवेद्यत्वमपि नास्ति । तदपेक्षाया अनुत्थानात् ॥ उत्थितौ वा वेदवेद्यमपूर्वमुत्पन्नं । पश्वादेः फलस्योत्पत्तेरिति वेदवेद्यत्वरूपोल्लेखेनैवानुमानं न पूर्वां शङ्कां स्पृशतीति न काचित्क्षतिः ॥

[417.] यथोक्तं नवमाद्ये गुरुणा निबन्धने । वेदवेद्यत्वाकारस्य लौकिकत्वे ऽपि वेदवेद्यं स्वरूपमलौकिकमेवेति ॥

[418.] अस्य ग्रंथस्याभिप्रायमाह नारदः । लिङ्-

Digitized by Google

वाच्यमपूर्वमित्येवमाकारं ज्ञानं लिङ्वाच्याभावेन लिङ्वाच्यताकारोल्लेखेनैवापूर्वं स्पृशतीति नैतादृशज्ञानवेद्यत्वे वेदैकवेद्यतालक्षणापूर्वत्वविहतिः। न वेदवेद्यताकारोल्लेखेन ज्ञायमानस्य यूपाहवनीयादेर्वेदैकवेद्यताविहतिरिति॥

[419.] अतस्स्थूलत्वं हेतोरिति सिद्धं॥

[420.] नन्वाचार्यकं लौकिकमध्यापनकर्तर्याचार्यशब्दप्रयोगात्। अतो लिङ्वाच्यत्वमभिमतं दूरनिरस्तं स्यात्॥ यथोक्तं वृद्धैः। लोके क्वाप्यप्रयुक्तत्वाद्विधिसाध्ये प्रयोगतः। अलौकिकार्थं यूपादिपदं कामं प्रसिध्यतु॥ नालौकिकार्थमाचार्यपदमेतद्व्रयात्ययति। मुखं गुरुमतस्यार्धं खण्डितं किमु पण्डितैरिति॥

[421.] मैवं। उपनीय तु यश्शिष्यं वेदमध्यापयेद्विजः। सकल्पं सरहस्यं च तमाचार्यं प्रचक्षत इति स्मृतिरभियुक्तश्रुतिस्मृतिप्रयुक्ताचार्यपदार्थसंशयनिवृत्त्यर्थं प्रणीतेति तावदास्थेयं॥

[422.] सा च न्यायतो विविच्यमाना यादृशे ऽर्थे पर्यवस्यति तादृशे स्मतेस्तात्पर्यं वाच्यं॥

[423.] तत्र यद्यपि क्रियायोगश्शब्दार्थ इति भाति। तथापि न तस्याः क्रियामात्रपरत्वं। तथात्वे लक्षणान्वाख्यानमात्रपरत्वं स्यात्॥ न चैतत्संभ-

Digitized by Google

वति॥ संशयनिवृत्त्यर्थमुपनीय तु यश्शिष्यं द्विजोऽध्यापयति श्रुतमिति लक्षणमवक्ष्यत्॥

[424.] तदनुपयोगिनी विध्युक्तिरयुक्ता सती वक्तुरयुक्ततामापादयति॥ विधेयस्यैव तल्लक्षणत्वेति विवक्षिते विध्युक्तिराजसीति विधिसिद्धमेवाध्यापनरूपमर्थमुपनीय तु यश्शिष्यमित्यादिना निर्दिश्य लक्षणं कृतमित्युपेयं॥

[425.] न च वाक्य भेदापत्तेरुभयविवक्षानुपपत्तिः। वक्तृतन्त्रे वाक्ये वाक्यभेदस्य चोदनासूत्रेऽर्थपदं प्रयुञ्जाने न सूत्रकारेणादोषतयाख्यापितत्वात्॥

[426.] तुशब्द उपाध्यायलक्षणात्केवलाध्यापनाद्यावृत्तिप्रतिपादकः॥

[427.] नन्वध्यापनस्य विधेयत्वमेव नास्ति। अन्यतः प्राप्तत्वादिति चेत्॥

[428.] मैवं। अन्यतः प्राप्तवादी प्रष्टव्यः किमध्ययनविधितः प्राप्त आहोस्विद्वृत्तित इति॥

[429.] नाद्यः। अध्ययविधेर्निरधिकारतया स्वविषयानुष्ठानेऽप्यशक्तत्वमुक्तं शास्त्रादौ गुरुणा तत्तत एवावधार्यं॥

[430.] न द्वितीयः। वृत्त्यर्थताप्यध्यापनस्याचार्य-

Digitized by Google

कद्वारिकैवेति नाचार्यकोत्पत्त्यर्थतया तं विधिं विहन्तीति ॥

[431.] तेनान्यतः प्राप्त्यभावाद्विध्यभावे ऽध्यापनस्याप्राप्तस्य लक्षणत्वेनाख्यानमयुक्तमित्यध्यापनस्य विधेयत्वसिद्धेः ॥

[432.] यद्वा । स्मृतेश्च लोकव्यवहारमात्रफलानर्हत्वादाचार्यपदार्थनिर्णयापेक्षवरदानविध्यनुष्ठानफलतैवोपेया ॥

[433.] तच्चाचार्याय वरो देय इति श्रौते वरदानविधावाचार्यशब्दार्थस्संप्रदानतयोपदिश्यते ॥ न च संप्रदानावस्थायामध्यापनक्रियायोग आचार्यशब्दार्थः । तस्यातीतत्वात् ॥

[434.] न च स्वरूपमात्रमर्थः । तस्य विधिं विनापिलाभे विधानानर्थक्यात् ॥

[435.] न च भूतपूर्वक्रियायोगावस्थालक्षणा श्रुतिस्मृतिप्रयुक्ता । आचार्यपदार्थतत्त्वनिर्णयार्थं प्रयुक्ताया अभियुक्तस्मृतेर्जघन्यार्थप्रकाशनपरत्वस्वीकारस्यानुचितत्वात् ॥

[436.] अनवगतस्य च तदुपलक्ष्यत्वात् ॥ पञ्जरस्थसिंह इत्यत्र पञ्जरोपलक्ष्यसिंहत्वाकारवदिह भूतक्रियायोगोपलक्षणीयस्याकारविशेषस्याभावात् ॥

Digitized by Google

अतः क्रियायोगातिरिक्तं संप्रदानावस्थानुवृत्त्यर्हम-दृष्टमाचार्यशब्दवाच्यमिति वरदानविधिबलादवगते तदुत्पादकक्रियापेक्षायां स्मृतेर्लक्षणभूतक्रियाविधि-परत्वमाश्रीयते ॥

[437.] तथा च तदनुगुणामूलश्रुतिरुपनीयाध्या-पयेदित्यनुमेया ॥

[438.] नन्वाचार्यकरणविधिप्रयुक्तत्वमध्ययनस्य साधयितुमाचार्यत्वकामो ऽध्यापयेदित्यधिकारविधि-रूपवेदानुमानं साधयितव्यं । किमित्युपनीयाध्या-पयेदित्याचार्यकस्य लिङर्थकत्वेन विनियोगमात्र-रूपवेदानुमानमिति चेत् ॥

[439.] मैवं। वरदानविध्यनुप्रविष्टाचार्यलक्षणा-न्वाख्यानमात्रपरायास्स्मृतेस्तदपेक्षितालौकिकाचा-र्यपदार्थोत्पादकक्रियाविनियोगमात्रोपक्षीणतास्वी-कार्या। न तद्विषयाधिकारविधिपरता। गौरवापत्तेः। अपेक्षाभावाच्च ॥

[440.] आचार्यत्वं नामाचार्यशब्दप्रवृत्तिनिमित्तं त्वतलादेर्निष्कृष्टप्रवृत्तिनिमित्तवचनस्वभावत्वात् ॥

[441.] तच्चाचार्यत्वमुपनयनांगकाध्यापनसाध्य-मदृष्टमिति तन्मात्रमेव विधिरनुजानातु। न ततो ऽतिरिक्तमिति। वरदानविध्यपेक्षापूरणार्थं विनियो-

Digitized by Google

गक्रियाविधिपरत्वमात्रमपेक्षितं स्मृतेर्न ततोऽतिरिक्तमधिकारविषयापूर्वफलं ॥

[442.] अतश्चापेक्षाभावो गौरवं च स्पष्टं ॥

[443.] किंचाचार्यकस्य सुखदुःखनिवृत्त्योरन्यतरत्वाभावेन स्वर्गादितुल्यनैयोगिकफलत्वं कल्पयितुं न शक्यते ॥

[444.] लिङ्वाच्यत्वे तु सुखदुःखनिवृत्त्योरन्यतरत्वाभावेऽपि वेदैकगम्यतृतीयप्रयोजनत्वमाचार्यकस्य समस्तीति प्रत्यक्षवेदेऽपि तन्मात्रपरताप्याधानादिविधेस्सिद्धैवेति नानुमेयेति न काचिदनुपपत्तिः ॥

[445.] नन्वेवं भवणाथेनोपनीयाध्यापनेनाचार्यकं भावयेदिति वचनव्यक्तिरुपन्यस्तेति चेत् ॥

[446.] भवनाथस्यायमभिप्रायः । यद्यपि तददृष्टं क्रियाफलं लिङर्थ एवेत्युपनीयाध्यापयेदित्येवं रूपैव पारमार्थिकीवचनव्यक्तिः । तथापि तस्यादृष्टस्याचार्यकपदाभिलप्यतया स्मृतिसिद्धत्वात्तेन च रूपेण वरदानादिलाभकरतयाध्यापकाभीष्टत्वात्काम्यतयैवार्थात्स्वविषयेऽध्यापनेऽधिकारापादकता । न नित्यादिनयोगवन्नियोगत्वेनैवेति प्रकटयितुमध्यापनस्यौपादानिककरणान्वयविवरणार्था वचनव्यक्तिरध्यापनेनाचार्यकं भावयेदित्येवं रूपोपन्यस्ता ॥

Digitized by Google

[447.] अत एवेदृशीं वचनव्यक्तिमुपन्यस्याह शारिकानाथः । अर्थादाचार्यो बुभूषोरधिकार इति ॥ आर्थिकमधिकारलाभं प्रकटयितुमेव तदनुगुणा वचनव्यक्तिरुपन्यस्तेत्यभिप्रायः ॥

[448.] नन्वेवं वरदानविध्यपेक्षिताचार्यकोत्पत्त्यर्थक्रियाविनियोगपरत्वाद्वाक्यस्य तद्विध्यनुवादता लिङः प्राप्नोतीत्याचार्यकस्य लिङ्वाच्यत्वमभिमतं न सिध्येत् ॥ यद्यपि सन्निधिसमाम्नानाभावान्न ग्राहकावस्थविध्यनुवादता । तथाप्याधानवाक्यस्थलिङ्वत्प्रयोजकावस्थविध्यनुवादता स्यादेव ॥

[449.] मैवं । आधानस्य हि संस्कारस्य ज्वलनगतत्वेन लिङ्वाच्यत्वासंभवात् । लिङः प्रयोजकापूर्वानुवादता स्वीकृता । अध्यापनजन्यस्य त्वाचार्यकसंस्कारस्याध्यापयितृगतत्वेन लिङ्वाच्यत्वं संभवत्येवेति न लिङनुवादता स्वीकार्या ॥

[450.] नन्वेवमप्याचार्यकसंस्कारस्य साधिकारविध्यनुप्रवेशित्वादृत्विक्संस्कारवल्लाभकरत्वे ऽपि स्वयमधिकारापादकत्वासंभवान्नाध्यापने ऽपि प्रयोजकतेत्यध्ययनप्रयोजकत्वमभिमतं दूरनिरस्तं स्यात् । अन्यथा ऋत्विक्संस्कारस्यापि याजने यजने ऽपि प्रयोजकता स्यात् ॥

Digitized by Google

[451.] मैवं । साधिकारविध्यनुप्रवेशिनो ऽप्याचार्यकस्य वरदानादिलाभकरतयाध्यापकाभीष्टस्य वस्तुवृत्त्याध्यापनाधिकारापादकत्वेन प्रयोजकत्वसंभवात् ॥

[452.] ऋत्विक्संस्कारस्य तु । लाभकरत्वे ऽपि यजमानाधीनतत्कर्तृकवरणादिसंपाद्यतयान्याधीनत्वेन स्वेच्छयासंपादयितुमशक्यत्वात् । न स्वातन्त्र्येणाधिकारापादकतेति न प्रयोजकतासंभव इति भेदः ॥

[453.] अतः परमार्थतो वचनव्यक्तिरूपनीयाध्यापयेदित्येवं रूपैव भवनाथस्याभिप्रेतेति मन्तव्यं॥

[454.] अतश्च लौकिकार्थक्रियासाधनत्वादिति हेतोर्व्यभिचारसिद्धः ॥

[455.] केचिदेवं परिहरन्ति । क्रियार्जनादिकासाधनं यस्य स्वत्वस्य तल्लौकिकार्थक्रियासाधनमिति बहुव्रीहिः। लौकिकार्थक्रियासाध्यत्वादित्यर्थः। अतो नोक्तन्यूनता न व्यभिचारश्च विज्ञानेश्वरमते ऽपीत्यनुसन्धेयमिति ॥

[456.] तदसत् । तत्पुरुषसमासं परित्यज्य जघन्यबहुव्रीहिसमासाश्रयणं पङ्कभिया पलायमानस्याशुचिपतनसमानमिति ॥



Digitized by Google

[स्वत्वहेतवः]

[457.] एवं च स्वत्वस्य लौकिकत्वे सिद्धे स्वामी-रिक्थक्रयसंविभागपरिग्रहाधिगमेषु ब्राह्मणस्याधिकं लब्धं क्षत्रियस्य विजितं निर्विष्टं वैश्यशूद्रयोरिति गौतमीयाधर्माः दृष्टार्थाधनार्जनोपायाः ॥

[458.] रिक्थादयस्तु पञ्चसर्वसाधारणाः ॥

[459.] रिक्थं नाम रिक्थार्जनं। पित्रादिधने स्वामित्वापादकं पुत्रादिजन्मेति यावत् ॥

[460.] तथा च पैतृकधनलाभहेतुत्वेनोक्तं गौतमेनैव। उत्पत्त्यैवायं स्वामित्वं लभत इत्याचार्या इति॥

उत्पत्त्यैव मातुर्गर्भे शरीरोत्पत्त्यैवेत्यर्थः ॥

[461.] अत एव विष्णुः। जन्मना स्वत्वमापद्यत इति ॥

[462.] पुत्रस्यैव न तु पुत्रिकाया इति भारुचिः ॥

[463.] संविभागः पित्रादिधनविशेषनिष्ठस्वामित्वसंपादको विभाग इति चन्द्रिकाकारः ॥

[464.] विज्ञानेश्वरस्त्वप्रतिबन्धो दायो रिक्थं। सप्रतिबन्धो दायसंविभाग इति। रिक्थशब्दस्य यद्यपि सप्रतिबन्धो दायो ऽर्थः। रिक्थग्राह ऋणं दाप्य इत्यादिदर्शनात्। तथाप्यप्रतिबन्धो दायो वि-

Digitized by Google

वक्ष्यते। अन्यथा विभागशब्दपौनरुक्त्यात्। विभागशब्देन तदुत्तरकालीनसप्रतिबन्धो दायो लक्ष्यते। विभागस्य स्वत्वहेतुत्वाभावादित्याह॥

[465.] एतन्न सहन्ते भारुच्यादयः। अप्रतिबन्धे दाये संबन्धातिरिक्तं जन्मापेक्षते। सप्रतिबन्धदाये तु प्रतिबन्धाभावो न कारणं तुच्छत्वादिति॥

[466.] परिग्रहः काननादिगतजलतृणकाष्ठादेरन्येनास्वीकृतस्य स्वीकारः॥

[467.] अधिगमो निध्यादेरुपलब्धिः॥

[468.] एतेषु निमित्तेषु सत्सु पुत्रादिः क्रेता संविभक्ता परिगृहीताधिगन्ता वा यथाक्रमेण पित्रादिधनस्य क्रीतस्य संविभक्तांशस्य परिगृहीतस्याधिगतस्य च स्वामीभवति॥

[469.] तथा लब्धं प्रतिगृहीतं ब्राह्मणस्याधिकं प्रातिस्विकमार्जनं। एवं क्षत्रियस्य विजितं जयलब्धं। एवं वैश्यस्य निर्विष्टं कृष्यादिभृतिरूपेण यल्लब्धं। शूद्रस्यापि निर्विष्टं द्विजशुश्रूषादिना वृत्तिरूपेण लब्धं प्रातिस्विकमर्जितमित्येवमर्जननिबन्धनार्थाया गौतमस्मृतेरर्थो विज्ञेयः॥

[470.] अतश्चेयं धर्मस्मृतिः साधुशब्दनिबन्धनार्थव्याकरणादिस्मृतिवत्स्मृतेत्यर्थः॥

Digitized by Google

[471.] अत्रेदं तत्त्वं। लोकप्रसिद्धानेव स्वत्वोपायान् प्रतिग्रहादीननूद्य ब्राह्मणादिवर्णोल्लेखेनादृष्टार्थतया नियन्तुं गौतमेन यत्नतो वचनमारब्धमिति॥

[472.] तथा च। यद्गर्हितेनार्जयन्ति कर्मणा ब्राह्मणा धनं। तस्योत्सर्गेण शुध्यन्ति जप्येन तपसैव चेति॥ शास्त्रैकसमधिगम्ये स्वत्वे गर्हितेनासत्प्रतिग्रहवाणिज्यादिना लब्धस्य स्वत्वमेव नास्तीति तत्पुत्राणां तदविभाज्यमेव॥ यदा तु स्वत्वं लौकिकं तदासत्प्रतिग्रहादिलब्धस्यापि स्वत्वात्तत्पुत्राणां तद्विभाज्यमेव॥ तस्योत्सर्गेण शुध्यन्तीति प्रायश्चित्तमर्जयितुरेव॥ तत्पुत्रादीनां तु दायत्वेन स्वमिति न तेषां दोषसंबन्धः॥ सप्तवित्तागमाधर्म्या दायो लाभः क्रयो जयः। प्रयोगः कर्मयोगश्च सत्प्रतिग्रह एव चेति स्मरणात्॥

[473.] स्वत्वस्य लौकिकत्वे क्वचिदेव परस्वत्वोत्पत्तिः। संकल्पमात्रेण स्वत्वनिवृत्तिश्च। क्वचित्तु महापातकादिनैव स्वत्वनिवृत्तिर्न संकल्पमात्रात्॥ अतश्च पितापुत्रसंबन्धो भर्तृभार्यासंबन्धश्च महापातकादौ निवर्तेत इति प्रपञ्चितं लीप्सासूत्रे॥

[474.] ननु स्वत्वं लौकिकमस्तु स्वाम्यं त्वलौकिकं। यथाह न्यायपूर्वकं संग्रहकारः। वर्तेते यस्य यद्धस्ते

Digitized by Google

तस्य स्वामी स एव न । अन्यस्वमन्यहस्तेषु चौर्यादेः किं न वर्तते ॥ तस्माच्छास्त्रत एव स्यात्स्वाम्यं नानुभवादपीति ॥ तस्माच्छास्त्रैकसमधिगम्यं स्वाम्यं । न पुनर्मानान्तरगम्यमित्यर्थः ॥

[475.] मैवं । यस्मात्स्वाम्यस्वत्वयोस्तुल्ययोगक्षेमयोरेकतरमधिकृत्य साधिते लौकिकत्वे द्वयोरपि साधितमेवेत्यवगन्तव्यं ॥

[476.] अतो यथाग्रन्थं लौकिकक्रियासाध्यत्वमेवाव्यभिचारात्स्वत्वस्य लौकिकत्वे हेतुरिति युक्तमुत्पश्यामः ॥

[477.] तथा च स्वत्वस्य लौकिकत्वान्नैयायिक एव स्वाम्यसंक्रमक्रमो । न वाचनिक । इति सिद्धं ॥

## [पत्नीविभागः]

[478.] तदुक्तं विज्ञानयोगिना । यत्तु पत्नीदुहितर इत्यादि स्मरणं तदपि स्वामिसंबन्धितया बहुषूपप्लवमानेषु व्यामोहनिवृत्तये प्रत्यासत्तितारतम्यन्यायनिबन्धनस्य स्वामितासंक्रमक्रमस्य निबन्धनमिति ॥

[479.] ननु पत्नीदुहितरन्यायावलंबनेन पत्न्याः पत्यंशहरत्वं स्यात् । तर्ह्यविभक्तपत्नीनामपि शरी-

रार्धं स्मृता जायेत्यादि वक्ष्यमाणन्यायस्य तुल्यत्वात्प-
त्न्यंशहरत्वं स्यादिति चेत् ॥

[480.] मैवं । विभक्तपत्नीनां प्रत्येकनियतद्रव्य-
सद्भावात्तत्रैव पत्नीदुहितरन्यायः । अविभक्तपत्नीनां
तु पत्युर्नियतद्रव्याभावात्समुदितद्रव्ये पत्न्यंशग्राहित्व-
स्याशक्यत्वात् पत्नीदुहितरन्यायो विभक्तविषय इति
ध्येयं ॥

[481.] ननु यद्येवं स्यात्तदाविभक्तानां सर्वेषां भ्रा-
तॄणां स्वर्यातानामंशग्राहित्वं तत्पत्नीनां न स्यात् ॥
तथा च स्मर्यते । अविभक्तपत्नीनां तद्दायहरत्वमिति ॥
सर्वेषां भ्रातॄणामभाव इति शेषः ॥

[482.] अत्रोच्यते । अविभक्तपत्नीनां तद्दायहरत्व-
मिति । तत्प्रतिज्ञातिसद्भावे ऽपि तत्सोदराभावे न
सर्वेषां दायस्य प्रत्येकपर्यवसितत्वेन नियतत्वसिद्धेर-
विभक्तत्वे ऽपि विभक्तवन्न्यायस्य सुप्रसरत्वात् ॥ पत्नी-
नामेवांशहरत्वं ॥

[483.] तत्र दुहितृमत्पत्न्यदुहितृमत्पत्नीविवेको
न कर्तव्य इति वैष्णवं मतं ॥

[484.] पत्नीदुहितरन्याय इति पत्नीदुहितरश्चेत्यादौ
पत्नीदुहितरेत्यस्यैकदेशस्यानुकरणं ॥

[485.] पत्नीदुहितरश्चेत्यत्र प्रत्यासत्तितारतम्यन्यायं

Digitized by Google

सूचयति मनुः। पिता हरेदपुत्रस्य रिक्थं भ्रातर एव वेति ॥

[486.] अत्र क्रमो न विवक्षितो वाशब्दप्रयोगात्॥

[487.] अस्य तात्पर्यार्थं संग्रहकार आह। अशेषात्मजहीनस्य मृतस्य धनिनो धनं। केनेदानीं गृहीतव्यमित्येतदधुनोच्यते ॥

[488.] अस्यायमर्थः। मुख्यगौणपुत्रहीनस्य धनवतो मृतस्य धनमिदानीं तन्मरणानन्तरं केन हर्तव्यमित्याकांक्षायां पित्रादिना हर्तव्यमित्येतदधुना पित्राद्यपेक्षया बहुविधोपकारकासन्नजनाभावे मनुनोच्यत इति ॥

[489.] अत एव पित्रादिभ्यो गौणपुत्राणामासन्नतरत्वं ज्ञात्वा संग्रहकारेण पिता हरेदपुत्रस्येत्यस्याशेषात्मजहीनस्येति तात्पर्यमुक्तं ॥

[490.] तदनवद्यमेव। किन्तु यथा गौणपुत्राणां दृष्टादृष्टोपकारकत्वेन पित्राद्यपेक्षयाग्रेसरत्वात्तदपेक्षयासन्नतरत्वं तथा पत्न्यापि दृष्टादृष्टोपकारेण श्रुतिस्मृत्यादिपर्यालोचनया पित्राद्यपेक्षयाग्रेसरत्वात्तदपेक्षयासन्नतरत्वमस्ति ॥

[491.] अतश्च पत्न्याप्यभावेऽपि पिता हरेदपुत्रस्येत्येतन्मनुनोच्यत इत्येवं तात्पर्यमूह्यते ॥

Digitized by Google

[492.] अत एव गौणपुत्राभावे दृष्टादृष्टोपकारकत्वलक्षणसंबन्धेनान्यापेक्षया पत्न्याः प्रत्यासन्नत्वमभिसन्धाय बृहस्पतिना तिष्ठत्स्वपि पित्रादिषु सकुल्यान्तेषु पत्न्या एव पतिधनभागभागित्वं दर्शितं। आम्नाये स्मृतितन्त्रे च लोकाचारे च सूरिभिः। शरीरार्धं स्मृता जाया पुण्यापुण्यफले समा॥ यस्य नोपरता भार्या देहार्धं तस्य जीवति। जीवत्यर्धशरीरेऽपि कथमन्यस्समाप्नुयात्॥ कुल्येषु विद्यमानेषु पितृभ्रातृसनाभिषु। असुतस्य प्रमीतस्य पत्नी तद्भागहारिणी॥

[493.] अच द्वितीयार्धेन शरीरार्धं स्मृतेत्यादिना दृष्टादृष्टोपकारसंपादने पित्रादिभ्यः पत्न्याः प्रत्यासन्नत्वमभिहितं॥

[494.] अवयवार्थस्तु।

आम्नाये वेद अर्धो वा एष आत्मनः। यत्पत्नीत्यादौ।

आत्मनो देहस्येत्यर्थः।

स्मृतितन्त्रे धर्मशास्त्रे। पतत्यर्धं शरीरस्य यस्य भार्या सुरां पिबेत्। पतितार्धशरीरस्य निष्कृतिर्न विधीयत इत्यादौ।

लोकाचारे लोकाचारानुमतार्थशास्त्र इत्यर्थः॥

Digitized by Google

शरीरार्धमयीं जायां को विहास्यति पण्डित इत्येवमादौ ॥

पुण्यापुण्यफले कर्मणि सहाधिकारात्। असुतस्य मुख्यगौणसुतविहीनस्य ॥

[495.] पत्नीयज्ञाधिकारापादकप्रशस्तब्राह्मादिविवाहसंस्कृता। पत्युर्नो यज्ञसंयोग इति पाणिनिस्मृतेः ॥

[496.] न क्रीता भार्या। पत्नीपदेन व्यावर्तितायास्तस्याः पत्नीत्वायोगात् ॥

[497.] तथा च स्मृत्यन्तरं। क्रयक्रीता तु या नारी न सा पत्न्यभिधीयते। न सा दैवे न सा पित्र्ये दासीं तां कवयो विदुः ॥

[498.] पत्नीत्वाभावे केवलदृष्टोपकारकत्वं नादृष्टोपकारकत्वं तस्या इति दर्शयितुं दासीं विदुरित्युक्तं ॥

[499.] अत्र केचित्तु विवाहसंस्कृता जाया पत्नीत्युच्यत इति चन्द्रिकाकारोक्तमित्यनुपपन्नं। विवाहसंस्कारस्य पत्नीत्वोत्पादकत्वाभावात्॥ पत्नीत्वं नाम पतिभार्यासंबन्धव्यतिरेकेण न किंचिदस्ति। तच्चार्थ्यार्जकरूपक्रियागर्भः संबन्धः। स च लौकिक एव॥ अत एव महापातकादौ भार्यात्वस्य निवृत्तिः ॥



Digitized by Google

भूतपूर्वगत्या भार्याभिमानः॥ न च विवाहे मन्त्र-नियमो भार्यात्वोत्पादकः। तस्य वैददानसिद्ध्यर्थ-त्वादित्युक्तं लीप्सासूत्रे गुरुणेत्याहुः॥

[500.] तन्न। गुरुणा तु पत्नीगतं स्वत्वमेव लौकिकमित्युक्तं। न पत्नीत्वं। स्वत्वपत्नीत्वयोर्भेदात्॥ यज्ञसंयोगात्पत्नी। स्वामिसंबन्धात्स्वमिति॥ महा-पातकादौ भार्यात्वस्यापि वियोग इति गुरुग्रन्थस्या-यमर्थः॥

[501.] भार्यात्वं नाम स्वत्वं न तु पत्नीत्वं। अन्यथा प्रायश्चित्ते कृते पुनः पत्नीत्वं न स्यादित्युक्तं भारुचिना॥

[502.] अयमेवाभिप्रायश्चन्द्रिकाकारादीनामिति सुष्टूक्तं ब्राह्मादिविवाहसंस्कृता जाया पत्नीत्युच्यत इति॥

[503.] अतश्च पत्युः पित्र्ये कर्मण्यपि भ्रात्राद्यपे-क्षयाग्रेसरत्वं पत्न्या एवाह बृहस्पतिः। पुत्राभावे तु पत्नी स्यात् पत्न्यभावे तु सोदर इति॥ पिण्डदान इति शेषः॥

[504.] अत्र वृद्धमनुः। अपुत्राशयनं भर्तुः पा-लयन्ती व्रते स्थिता। पत्न्येव दद्यात्तत्पिण्डं कृत्स्नमंशं लभेत सेति॥

[505.] उत्तरार्धे पाठक्रमादर्थक्रमोवगन्तव्यः॥

Digitized by Google

पत्नी भर्त्रंशं पूर्वं लभते पश्चात्पिण्डं दद्यात्। न पुनस्तस्यां सत्यां भ्रात्रादिरित्यर्थः॥

[506.] पिण्डदोऽंशहरश्चैषां पूर्वाभावे परःपर इत्यत्राप्येवमेव व्याख्येयं॥ अंशहरणस्यैव पिण्ड-दाननिमित्तत्वेनैवोक्तत्वात्॥

[507.] शयनं पालयन्ती सुसंयतेत्यर्थः।

[508.] कृत्स्नमंशं लभेतेति कृत्स्नशब्दार्थमाह प्रजा-पतिः। जंगमं स्थावरं हेमकुप्यधान्यरसाम्बरं। आदाय दापयेच्छ्राद्धं मासषाण्मासिकादिकं॥ पितृव्यगुरुदौ-हित्रान् भर्तुश्श्वशुरमातुलान्। पूजयेत्कव्यपूर्ताभ्यां वृद्धा-नाथातिथींस्तथा॥

कुप्यं त्रपुसीसादिकं।

कव्यं पित्रर्थं संकल्पितमन्नं।

पूर्तलक्षणं प्रागेवोक्तं॥

[509.] एतदुक्तं भवति। स्थावरेणापि सहितं कृत्स्नमंशमादाय धनसाध्यस्त्र्यधिकारश्राद्धपूर्तादिकं पत्युरात्मनश्च श्रेयस्साधनं धर्मजातं पत्न्या गृहीतध-नानुसारेण कार्यमिति॥

[510.] यत्तु बृहस्पतिनोक्तं। यद्विभक्तधनं किञ्चि-दाध्यादिविविधं स्मृतं। तज्जाया स्थावरं मुक्त्वा लभेत मृतभर्तृका॥ यत्किञ्चिदाध्यादिविविधं स्थावरजंग-

Digitized by Google

मात्मकं भर्तृस्वामिकं स्मृतं तत्सर्वं विभक्तविषयं पत्नी लभेतेत्यर्थः ॥

[511.] विभक्तग्रहणादविभक्तविषये तु सहवासिन एव भ्रात्रादयो मृतस्यापुत्रस्य धनं लभेरन्निति गम्यते ॥ एतत्पूर्वमेव सयुक्तिकमुक्तमप्यत्र ज्ञापितं ॥

[512.] जाया स्थावरं मुक्त्वेत्येतद्दुहितृरहितपत्नी-विषयं ॥ पत्नीमात्रविषयत्वे जंगमं स्थावरं हेमकुप्य-धान्यरसाम्बरं । आदाय दापयेच्छ्राद्धं मासषाण्मा-सिकादिकमिति पूर्वोक्तवचनविरोधस्यादिति चन्द्रि-काकारः ॥

[513.] अत्र चन्द्रिकाकारस्यायमाशयः । दुहितृ-रहितदुहितृसहितपत्न्योस्सन्निपाते दुहितृसहिताया एव पत्न्यास्स्थावरं न दुहितृरहितायाः । दुहितृरहि-तायास्तु जंगमांशः । जंगमद्रव्ये तु यथांशस्वीकारः ॥ यदा दुहितृरहितैव पत्नी स्यात्तदा तस्या एव स्थावरं जंगमं च । नान्यस्या दुहितृसहिताया मात्रादेः । तस्यास्तु पत्न्यपेक्षया बहिरंगत्वस्योक्तत्वादिति ॥

[514.] न च तद्विरोधपरिहारायाविभक्तपत्न्यंश-विषयं चेदं वचनमस्त्विति वाच्यं ॥ यत एवं प्रकारां व्यवस्थां निराकर्तुमाह स एव । वृत्तस्यापि कृते ऽप्यंशे न स्त्री स्थावरमर्हतीति ॥

Digitized by Google

[515.] सन्तानवृत्तिभूतस्थावरार्हता सन्तानशालित्वायत्तेति तच्छून्या स्त्री वृत्तस्यापि विभक्तविषयेऽपि स्थावरं नार्हतीति गतार्थः ॥

[516.] मृते भर्तरि भर्त्रंशं लभते कुलपालिका।
यावज्जीवं हि तत्स्वाम्यं दानाधमनविक्रये ॥

आधमनमाधिः ॥

[517.] स्त्रीणां तु विभक्तदशायामपि भरणमेव॥

[518.] संभोगार्थमानीता स्त्रीत्युच्यते॥ क्रयक्रीता तु या नारी संभोगार्थं सुखार्थिना गृहीता वान्यदीया वा सैव स्त्री परिकीर्त्यते ॥

अन्यदीया परकान्ता ॥

[519.] योषिद्ग्राह ऋणं दाप्य इत्यत्र योषिच्छब्दार्थतया निरूपिता ॥

[520.] तस्यास्त्वया नांशभागित्वमित्याह कात्यायनः। स्वर्याते स्वामिनि स्त्री तु ग्रासाच्छादनभागिनी। अविभक्तधनांशं तु प्राप्नोत्यामरणान्तिकं ॥

उत्तरार्धः पत्नीविषयः ॥

[521.] अविभक्तायाः पत्न्या अप्यंशोऽस्ति। यथाह स एव। अपुत्रा शयनं भर्तुः पालयन्ती व्रते स्थिता। भुञ्जीतामरणं क्षान्ता दायादा ऊर्ध्वमाप्नुयुः॥

[522.] एतच्च भरणाक्षमेषु श्वशुरेषु विज्ञेयं ॥

Digitized by Google

यथाह बृहस्पतिः। प्रदद्याद्वत्सरे पिण्डं क्षेत्रांशं वा यदृच्छयेति ॥

वत्सरे वत्सर इति प्रतिवत्सरं।

जीवनमात्रसाधनं द्रव्यं पिण्डशब्दार्थः ॥

[523.] जीवनमात्रसाधनस्य द्रव्यस्य स्वल्पामियत्तामाह नारदः। आढकांस्तु चतुर्विंशच्चत्वारिंशत्पणांस्तथा। प्रतिसंवत्सरं साध्वी लभेत मृतभर्तृका ॥

आढको ऽष्टोनद्विशतप्रसृतिपरिमितधान्यचयः।

पणः कार्षापणः। व्यावहारिकनिष्काशीतिभाग इत्यपरे ॥

[524.] स्त्रीभ्यो यद्दत्तं तत्परिपालनीयमित्याह कात्यायनः। स्थावराज्जीवनं स्त्रीभ्यो यद्दत्तं श्वशुरेण तु। न तच्छक्यमपाकर्तुमितरैश्श्वशुरे मृते ॥

[525.] श्वशुरग्रहणं भरणकारिणामुपलक्षणार्थं॥ स्थावरग्रहणं च धनस्योपलक्षणार्थं॥ तेन धनमपि जीवनार्थं स्त्रीभ्यो दत्तमपाकर्तुमितरैरित्यवगन्तव्यं॥

[526.] तदपवादमाह कात्यायनः। भोक्तुमर्हति कृप्तांशं गुरुशुश्रूषणे रता। न कुर्याद्यदि शुश्रूषां चैलपिण्डे नियोजयेत् ॥

कृप्तांशमपहृत्येति शेषः॥

[527.] अथ यावज्जीवं भरणवृत्तिमाह विष्णुः। प्रतिसंवत्सरं चत्वारिंशत्पणाश्चतुर्विंशदाढकाः। अथवा यावज्जीवं शतं कार्षापणाः। तदर्धं वेति॥

[528.] अकार्यकारिणीनामपि कृप्तांशहरणं कार्यमित्याह स एव। निर्मर्यादानां कृप्तांशहरणं कार्यमिति॥

निर्मर्यादाव्यभिचारिण्यः॥

[529.] अत एवाह नारदः। भरणं चास्य कुर्वीरं स्त्रीणामाजीवनक्षयात्। रक्षन्ति शय्यां भर्तुश्चेदाच्छिन्द्युरितरासु तत्॥ इतरासु व्यभिचारिणीषु। तद्भरणं॥

[530.] यत्तु मनुनोक्तं। एवमेवविधिं कुर्याद्योषित्सु पतितास्वपि। वस्त्रान्नमासां देयं तु वसेयुश्च गृहान्तिक इति॥ तद्भर्तृकर्तृकविषयं।

[531.] एवं च स्त्रीणां यद्भरणप्रतिपादकं वचनजा.ं तदविभक्तपत्नीविषयं। विभक्तस्त्रीविषयं च वेदितव्यं॥

[532.] यच्च। अपुत्रा शयनं भर्तुः पालयन्ती व्रते स्थिता। भुञ्जीतामरणं क्षान्ता दायादा ऊर्ध्वमाप्नुयुरिति॥ यच्च। स्थावरं जंगमं चैव कुप्यधान्यरसाम्बरं। मृते भर्तरि भर्त्रंशं लभेत कुलपालिका॥ यावज्जीवं

Digitized by Google

हि तत्स्वाम्यं दानाधमनविक्रय इति वचनद्वयं दुहितृरहितपत्नीविषयं वेदितव्यं ॥ दायादा ऊर्ध्वमाप्नुयुरिति यावज्जीवं हि तत्स्वाम्यमिति स्मरणद्वयसामर्थ्यात् ॥

[533.] यद्यपि सन्तानहीनाया उपरमे तद्‌ज्ञातीनामेव तद्धनं । तथापि दुहितृसहितायाः पत्न्या उपरमे तद्दुहितृदौहित्रादीनामेव तद्धनप्राप्तिः ॥

[534.] तद्वदत्रापि दुहितृरहितपत्न्या उपरमे दुहित्रादीनामभावे तत्पित्रादीनां धनप्राप्तिर्माभूदिति दायादा ऊर्ध्वमाप्नुयुरित्ययमारंभ इत्यवगन्तव्यं ॥

[535.] तस्मादपुत्रस्य विभक्तस्य स्वर्यातस्यासंसृष्टिनो भर्तुर्धर्मपत्नी सकलं स्थावरं जंगमं च गृह्णातीत्येवं परं पत्नीदुहितरश्चेत्यादिवचनजाते पत्नीग्रहणमिति स्थितं ॥

## [दुहितृविभागः]

[536.] तत्र पत्न्यभावे दुहितरः ॥

[537.] तत्र दुहितर इति बहुवचनं समानजातीयानां समविषमांशप्राप्त्यर्थमिति लक्ष्मीधरः ॥

[538.] तथा च कात्यायनः । पत्नी भर्तृधना-

हारीया स्यादव्यभिचारिणी। तदभावे तु दुहिता यद्यनूढा भवेत्तदेति ॥

[539.] बृहस्पतिरपि। भर्तुर्धनहरी पत्नी तां विना दुहिता स्मृता। अंगादंगात्संभवति पुत्रवद्दुहिता नृणां॥ तस्मात्पितुर्धनं त्वन्यः कथं गृह्णीत मानव इति ॥

[540.] अत्रोढानूढासमवाये ऽनूढैव गृह्णाति। तदभावे ऊढा दुहिता। यद्यनूढाभवेत्तदेति विशेषस्मरणात् ॥

[541.] तथा प्रतिष्ठिताप्रतिष्ठितासमवाये ऽप्रतिष्ठितैव। तदभावे प्रतिष्ठिता॥ स्त्रीधनं दुहितॄणामप्रत्तानामप्रतिष्ठितानां चेति गौतमवचनस्य पितृधने ऽपि समानत्वात् ॥

[542.] चकारः पुत्रतुल्यन्यायप्रतिपादनपर इत्याहुः ॥

[543.] यथाह मनुः। यथैवात्मा तथा पुत्रः पुत्रेण दुहिता समा। तस्यामात्मनि तिष्ठन्त्यां कथमन्यो धनं हरेदिति ॥

आत्मन्यात्मतुल्यपुत्रसमायामित्यर्थः ॥

[544.] नन्वेवमयं न्यायः गौणपुत्रपत्न्योरभावे दुहितर इति न प्रसरति। किन्त्वौरसाभावमात्रे दुहितेत्येतावन्मात्रसाधकत्वात् ॥

P

Digitized by Google

[545.] सत्यं। किन्त्वेवमेव गौणपुत्रपत्न्योरभावे दुहितेत्यत्र क्रमे न्याय ऊहनीय इत्यभिप्रायेणोक्तं॥

[546.] अत एव नारदेनोभयोरप्यभावे दुहितेति क्रमानुसारन्यायस्स्वयमूहितो मन्दानुग्रहाय प्रदर्शितः।

पुत्राभावे तु दुहिता तुल्यसन्तानदर्शनादिति॥

[547.] अयमर्थः। पुत्रश्च दुहिता चोभौ तुल्यसन्तानकारकावुभौ स्वपितृश्रेयस्करावित्यर्थः॥

[548.] तथा हि। पौत्रदौहित्रयोः पुत्रदुहितृसन्तानयोः स्वरूपतस्तुल्यत्वाभावात्कार्यतो ऽत्र तुल्यत्वमभिप्रेतं॥ न च ऋणापाकरणरिक्थग्रहणलक्षणकार्यतस्तुल्यत्वं संभवति। पुत्रपौत्रै ऋणं देयमिति तथा पितामहद्रव्यमधिकृत्यः। तत्र स्यात्सदृशं स्वाम्यं पितुः पुत्रस्य चोभयोरिति स्मरणाच्च पौत्रस्याधिक्यप्रतीतेः॥ तेनात्रादृष्टकार्यतस्तल्यत्वमभिप्रेतं॥ तच्च श्राद्धदातृत्वं॥ पूर्वेषां तु स्वधाकारे पौत्रा दौहित्रका मता इति विष्णुस्मरणात्॥

[549.] एवं च दुहितुस्सन्तानमुखेनादृष्टोपकारसंबन्धेनासन्नता॥

[550.] पत्न्यास्तु साक्षादग्निहोत्रादिजन्यादृष्टोपकारसहकारित्वेन दुहितुस्सकाशात्प्रत्यासन्नतरत्वं॥

Digitized by Google

अतश्च पुत्राभावे दुहितेत्यत्र पुत्रग्रहणं पत्न्या अपि प्रदर्शनार्थं मन्तव्यं ॥

[551.] नन्वेवं स्वयमेव पिता श्राद्धदानेनादृष्टोपकारक इति दुहित्रपेक्षयासन्नतरत्वात्पत्न्यभावे दुहितुः कथं धनग्रहणमिति चेत् ।

[552.] मैवं । तस्यामात्मनि तिष्ठन्त्यां कथमन्यो हरेद्धनमित्यनेनैवोक्तत्वात् ॥ तथाहि । यद्यप्यदृष्टोपकारसंबन्धेन पितुस्सकाशाद्व्यवहिता तथा शरीरसंबन्धेनाव्यवहितेत्युभयथा दुहितैवाग्रेसरी ॥

[553.] एवं तर्हि दुहित्रभावे पिता हरेदित्यस्यावसरस्स्यात्॥

[554.] मैवं । अधुनापि न तस्यावसरस्स्यात् । दुहित्रभावे दौहित्रस्य तत्कोपित्वेन पित्राद्यपेक्षयासन्नत्वात् ॥ अपुत्रपौत्रसन्ताने दौहित्रा धनमाप्नुयुः। पूर्वेषां तु स्वधाकारे पौत्रा दौहित्रका मता इति विष्णुस्मरणाच्च ॥

[555.] अत्र धारेश्वरदेवस्वामिदेवरातश्रीकरादयो दुहितृगामिधनमिति विधायकं वचनजातं पुत्रिकाविषयमेवेत्याहुः ॥

[556.] तन्मतं दूषयति चन्द्रिकाकारः । तथा च चन्द्रिकाग्रन्थः । धारेश्वरदेवस्वामिदेवरातमतं प्रति-

Digitized by Google

तन्नसिद्धान्तानभिज्ञानोन्मादकल्पितं निरस्तं वेदितव्यमिति ॥

तन्नसिद्धान्तः स्वसिद्धान्तः ॥

[557.] विज्ञानेश्वरेणापि दूषितं। यथा मिताक्षरायन्थः। न चैतत्पुत्रिकाविषयं। तत्समः पुत्रिकासुत इति पत्रिकायास्तत्सुतस्य चौरससमत्वेन पुत्रप्रकरणेऽभिधानादिति ॥

[558.] धारेश्वरादीनामयमभिसन्धिः। गौणपुत्राणामौरसेन सह दशविधत्वमेव। पुत्रिकासुतस्य स्वयंकृतसुतस्य स्वमतिकल्पितत्वात्पुत्रत्वं नास्ति। किन्तु दायभाक्त्वमात्रं। अतश्च पुत्रिकैव सुतः पुत्रिकासुत इति पुत्रिकायास्सुतः पुत्रिकासुत इति समासद्वयांगीकारेऽपि पुत्रिकायास्सुतस्य पौत्रतुल्यत्वं पुत्रिकारूपसुतस्य तु पुत्रतुल्यतया पत्न्या अप्यन्तरंगत्वात्पूर्वं पुत्रिकाया धनप्राप्तिः पुत्रवत्तदनन्तरं पत्न्या इति न्यायप्रतिपादनार्थं पत्नीदुहितश्चेति चकारः॥ दुहितर इति बहुवचनमपुत्रिकाया दुहितृपुत्रिकाकरणदुहितृपुत्रिकासुतजननीरूपदुहितृणामुपसंग्रहार्थं॥ अतश्च। अशेषात्मजहीनस्य मृतस्य धनिनो धनमित्यादिसंग्रहकारादिवचनेष्वशेषात्मजपदेन पुत्रिकाया अनुपसंग्रहात्तदर्थं पुत्रिकासुत इति वचने

त्वौरसादर्धधनभाक्त्वमपि सिद्धमिति॥ अतश्च त्रिवि-धानां पुत्रिकाणां मध्ये पुत्रिकाकरणदुहितुस्समुदित-द्रव्यस्यार्धमितरयोस्तु दुहित्रोरर्धमिति॥ एतच्च धारे-श्वरादीनामभिमतियोग्यमित्युल्लिखितं॥

[559.] एतन्न संगच्छते। पुत्रिकायास्सुत इति पुत्रिकैव सुत इत्यत्र सुतशब्दस्य दायभाक्त्वमात्रेण गौणार्थता न युज्यते। पितुरौर्ध्वदैहिकादिपुत्रकृत्य औरसाभावे तस्यैवाधिकारस्मरणात्। गौणसुतत्वं नामा नौरसत्वमिति। अतश्च पुत्रसमानयोगक्षेम-तया पूर्वमेव दायग्रहणस्य प्रतिपादनादित्यलमति-विस्तरेण॥

[560.] केचित्तु पत्नीदुहितरश्चैवेत्येवकारेण पत्न्या यज्ञसंयोगवत्या दुहितर एव न स्त्रियाः। चकारात् पत्न्या अपीत्याहुः॥

[561.] तन्न। तथा च सति धनस्य दुहितृगा-मित्वानन्तरं पत्न्यभिगामित्वं स्यात्। तथा च पूर्वोक्त-न्यायविरोधः स्यादिति॥

## [दौहित्रविभागः]

[562.] अत्र चशब्दाद्दुहित्रभावे दौहित्रो धनभाक्। तत्कोपित्वात्॥

[563.] यथाह विष्णुः। अपुत्रपौत्रसन्ताने दौहित्रा धनमाप्नुयुः। पूर्वेषां तु स्वधाकारे पौत्रा दौहित्रका मता इति॥

[564.] मनुरपि। अकृता वा कृता वापि यं विन्देत्सदृशं सुतं। पौत्रीमातामहस्तेन दद्यात्पिण्डं धनं हरेदिति॥

## [पित्रोर्विभागः]

[565.] तदभावे पितरौ मातापितरौ धनभाजौ॥

[566.] मातृशब्दस्य द्वन्द्वे पूर्वनिपातात्। द्वन्द्वबाधकत्वादेकशेषस्य। विग्रहवाक्ये मातृशब्दस्य पूर्वस्मरणात्। पाठक्रमादेवार्थक्रमावगमात्। धनसंबन्धेऽपि क्रमापेक्षायां प्रतीति क्रमानुरोधेनैव प्रथमं माता धनभाक्॥

[567.] तदभावे पितेति गम्यते॥

[568.] किञ्च पिता पुत्रान्तरेष्वपि साधारणः। माता तु न साधारणीति प्रत्यासत्त्यतिशयः॥

[569.] अनन्तरं सपिण्डाद्यस्तस्य तस्य धनं हरेदिति वचनान्मातुरेव प्रथमं धनग्रहणं॥

[570.] मातापित्रोर्मातुरेव प्रत्यासत्त्यतिशयाद्ध-

Digitized by Google

नग्रहणं युक्ततरं॥ तदभावे पिता धनभागिति विज्ञानेश्वरमतं॥

[571.] चन्द्रिकाकारेण तु पितुरेव प्रथमं धनग्रहणाधिकारः प्रतिपाद्यते। तदभावे पितृगामि तदभावे मातृगामीति विष्णुस्मृतेरिति॥

[572.] चन्द्रिकाकारमताद्विज्ञानयोगिमतमेव सम्यक्। न्यायमूलतया प्रतिपादनात्॥

[573.] अनेन श्रीकरोक्तं पित्रोर्विभज्यधनग्रहणं निरस्तं वेदितव्यं॥

## [भ्रातृविभागः]

[574.] पित्रभावे भ्रातरो धनभाजः॥

[575.] यथाह मनुः। पिता हरेदपुत्रस्य रिक्थं भ्रातर एव वेति॥

[576.] यत्पुनर्धारेश्वरेणोक्तं। अनपत्यस्य पुत्रस्य माता दायमवाप्नुयात्। मातर्यपि च वृत्तायां पितुर्माता धनं हरेदिति मनुवचनाज्जीवत्यपि पितरि मातरि वृत्तायां पितुर्माता पितामही धनं हरेत्। न पिता। यतः पितृगृहीतं धनं विजातीयेष्वपि पुत्रेषु गच्छति पितामहीगृहीतं तु सजातीयेष्वेव गच्छतीति पितामह्येव गृह्णातीति॥

Digitized by Google

[577.] तद्विज्ञानयोगी न मन्यते। विजातीयपुत्राणामपि धनग्रहणस्योक्तत्वात्। चतुस्त्रिद्व्येकभागास्स्युरित्यादिना॥

[578.] भ्रातृष्वपि सोदराः प्रथमं गृह्णीयुः। भिन्नोदराणां मात्रा विप्रकर्षात्॥

[579.] सोदराणामभावे भिन्नोदरा धनभाजः॥

[भ्रातृपुत्रविभागः]

[580.] भ्रातृणामभावे तत्पुत्राः पितृक्रमेण धनभाजः। पितृतो भागकल्पनेति वचनात्॥

[गोत्रजविभागः]

[581.] भ्रातृपुत्राणामभावे गोत्रजा धनभाजः पितामही सपिण्डाः समानोदकाश्च॥

[582.] तत्र पितामही प्रथमं धनभाक्॥

[583.] मातर्यपि च वृत्तायां पितुर्माता धनं हरेदिति मात्रनन्तरं पितामह्या धनग्रहणे प्राप्ते पित्रादीनां भ्रातृसुतपर्यन्तानांबद्धक्रमत्वेन मध्येऽनुप्रवेशाभावत्पितुर्माता धनं हरेदित्यस्य वचनस्य धनग्रहणाधिकारप्राप्तिमात्रपरत्वादुत्कर्षे तत्सुतानन्तरं पितामही गृह्णात्यविरोधादिति विज्ञानयोगिमतं॥

Digitized by Google

[584.] एतन्न सहते चन्द्रिकाकारः। पत्न्यादीनां भ्रातृसुतपर्यन्तानां बद्धक्रमत्वेन मध्य अनुप्रवेशाभावादित्युक्तं॥ मातर्यपि च वृत्तायां पितुर्माता धनं हरेदिति क्रमस्योक्तेः। अपुत्रधनं पत्न्यभिगामि। तदभावे दुहितृगामि। तदभावे मातापितरौ गृह्णीयातां। तदभावे पितुर्माता भ्रातरस्सपिण्डा इति विष्णुस्मृतेश्च। मात्रनन्तरं पितामह्या धनभाक्त्वमिति॥

[585.] अत्र विज्ञानयोगिमतमेव सम्यगित्याहुः॥

## [सपिण्डविभागः]

[586.] पितामह्याश्चाभावे समानगोत्रजास्सपिण्डाः पितामहादयो धनभाजः। भिन्नगोत्रजानां सपिण्डानां बन्धुशब्देन ग्रहणात्॥

[587.] तत्र पितृसन्तानाभावे पितामहः। पितृव्यास्तत्पुत्राश्च क्रमेण धनभाजः॥

[588.] पितामहसन्तानाभावे प्रपितामही प्रपितामहस्तत्पुत्रास्तत्सूनवश्चेति॥

[589.] एवमासप्तमात्समानगोत्राणां सपिण्डानां धनग्रहणं वेदितव्यं। अनन्तरस्सपिण्डाद्यस्तस्य तस्य धनं हरेदिति स्मरणात्॥

[590.] तेषामभावे समानोदका धनभाजः॥ ते



Digitized by Google

च सपिण्डानामुपरि सप्त वेदितव्याः । जन्मनामज्ञानावधिका वा ॥

[591.] यथाह मनुः । सपिण्डता तु पुरुषे सप्तमे विनिवर्तते । समानोदकभावस्तु निवर्तेता चतुर्दशात् ॥ जन्मनामस्मृतेरेके तत्परं गोत्रमुच्यत इति ॥

[592.] अनेन संग्रहकारोक्तक्रमः । तादृग्दुहित्रभावे ऽपि माता धनमवाप्नुयात् । विद्यमाने ऽपि पितरि सपत्नीसुतसन्ततौ ॥ तादृग्भ्रातुरभावे ऽपि पितुर्माता हरेद्धनं। विद्यमाने ऽपि पितरि क्षत्रियासुतसन्ततौ ॥ पितामह्या अभावे ऽपि पिता धनमवाप्नुयादिति निरस्तो वेदितव्यः ॥

[593.] धारेश्वरोत्प्रेक्षितन्यायमूलत्वादस्य क्रमस्य विश्वरूपादिभिरेवाध्याहारादीनवलंब्य दूषितत्वान्नास्माभिर्दूष्यते । पूर्वोक्तन्यायविरोधाच्च ॥

[594.] यत्तु तेनैवोक्तं । सोदर्यास्त्वन्यसोदर्या भ्रातरो द्विविधा यदि । विद्यमाने ऽप्यसोदर्ये सोदर्या एव भागिन इति। तत्सम्यज्ज्ञानमूलत्वादादरणीयं ॥

[बान्धवविभागः]

[595.] बान्धवास्त्वासन्नतरक्रमेणैव स्मृत्यन्तरे दर्शिताः । आत्मपितृष्वसुः पुत्रा आत्ममातृष्वसु-

Digitized by Google

सुताः। आत्ममातुलपुत्राश्च विज्ञेया आत्मबान्धवाः॥ पितुः पितृष्वसुः पुत्रा पितुर्मातृष्वसुस्सुताः। पितुर्मातुलपुत्राश्च विज्ञेयाः पितृबान्धवाः॥ मातुः पितृष्वसुः पुत्रा मातुर्मातृष्वसुस्सुताः। मातुर्मातुलपुत्राश्च विज्ञेया मातृबान्धवाः॥

[596.] एतेषां गोत्रजाभावे धनसंबन्धः॥

[597.] तत्र चान्तरंगत्वात्प्रथममात्मबान्धवा धनभाजः। तदभावे पितृबान्धवा धनभाजः। तदभावे मातृबान्धवा इति क्रमो वेदितव्यः॥

[598.] न चात्र पितुस्सकाशान्मातुरेवाभ्यर्हितत्वात्तद्बान्धवानां पितृबान्धवेभ्यः पूर्वमेव धनभाक्त्वमिति वाच्यं॥ पितुस्सकाशादन्येभ्यो येभ्यो माता गरीयसीति स्मरणान्मातुरेवाभ्यर्हितत्वं न मातृबान्धवानामिति पितृबान्धवेभ्यः पश्चादेव मातृबान्धवानां धनभाक्त्वमिति युक्तमुत्पश्यामः॥

## [आचार्यविभागः]

[599.] तदभाव आचार्यः॥

[600.] उपनीय तु यश्शिष्यं वेदमध्यापयेद्द्विजः। सकल्पं सरहस्यं च तमाचार्यं प्रचक्षत इत्यनेन

Digitized by Google

योनिसंबन्धवद्विद्यासंबन्धो ऽपि धनभाक्त्वहेतुरिति सूचितं ॥

[शिष्यविभागः]

[601.] तदभावे शिष्यः। शिष्ये ऽपि विद्यासंबन्धस्य विद्यमानत्वात् ॥

[602.] अत एवाहापस्तंबः। पुत्राभावे यः प्रत्यासन्नस्सपिण्डस्तदभाव आचार्य आचार्याभाव अन्तेवासीति ॥

[603.] अनेनास्मिं वचने पुत्राभावे यः प्रत्यासन्न इत्यनेन योनिसंबन्धो धनभाक्त्वहेतुः। तदभाव आचार्य इत्यादिना विद्यासंबन्धो ऽपि धनभाक्त्वनिमित्तमिति ॥

[सब्रह्मचारिविभागः]

[604.] शिष्याभावे सब्रह्मचारी धनभाक् ॥

[605.] येन सहैकस्मादाचार्यादुपनयनाध्ययनतदर्थज्ञानप्राप्तिः स सब्रह्मचारी भ्रातृतुल्यः ॥

[सन्ततिहीनब्राह्मणधनविभागः]

[606.] तदभावे ब्राह्मणद्रव्यं यः कश्चिच्छ्रोत्रियो गृह्णीयात्। श्रोत्रिया ब्राह्मणस्यानपत्यस्य रिक्थं भजेरन्निति गौतमस्मरणादिति विज्ञानेशः ॥

Digitized by Google

[607.] भारूच्यादयस्तु सब्रह्मचारिणां भ्रातृतुल्यतया तत्पुत्राणां पत्नीनां तत्पत्न्यादीनामभावे श्रोत्रियब्राह्मणगामित्वमाहुः ॥

[608.] असहायादयस्तु योनिसंबन्धानन्तरं विद्यासंबन्धवशादाचार्यगामि त्वेतद्धनं तदभावे तत्पुत्रगामि तदभावे तत्पत्नीगामि। पत्न्या अपि रिक्थिनो मातृतुल्यत्वादाचार्यपुत्रस्याचार्यतुल्यत्वात्। उभयाभावे शिष्यगामि शिष्याभावे तत्पुत्रगामि तदभावे तत्पत्न्यभिगामि तदभावे सब्रह्मचारिगामि तदभावे सच्छ्रोत्रियब्राह्मणगामि तदभावे श्रोत्रियमातृगामि तदभावे ब्राह्मणमातृगामीत्याहुः ॥

[609.] यथाह मनुः। सर्वेषामप्यभावे तु ब्राह्मणा रिक्थभागिनः। त्रैविद्याः शुचयो दान्तास्तथा धर्मो न हीयत इति ॥

[610.] न कदाचिदपि ब्राह्मणद्रव्यं राजा गृह्णीयात्। न हार्यं ब्राह्मणद्रव्यं राज्ञां नित्यमिति स्थितिरिति मनुवचनात् ॥

[611.] नारदेनाप्युक्तं। ब्राह्मणार्थस्य तन्नाशे दायादश्चेन्न कश्चन। ब्राह्मणायैव दातव्यमेनस्वी स्यान्नृपो ऽन्यथेति ॥

Digitized by Google

[सन्ततिहीनेतरवर्णधनविभागः]

[612.] यत्तु मनुनोक्तं। इतरेषां तु वर्णानां सर्वाभावे हरेन्नृप इति॥ शूद्रव्यतिरिक्तवर्णानां क्षत्रियवैश्यानामेव धनं सब्रह्मचारिपर्यन्तानामभावे राजा तद्धनं हरेत्। न ब्राह्मण इत्यर्थः॥

[613.] शूद्रस्य तु भ्रातृपर्यन्ताभावे राजगामि धनं॥ शूद्रस्यैकोदराभावे राजा धनमवाप्नुयादिति॥

[वानप्रस्थधनविभागः]

[614.] एवं योनिसंबन्धविद्यासन्तत्योः प्राधान्येन यौनसन्ततेर्दायग्रहणक्रममुक्त्वा विद्यासंबन्धसन्ततेर्दायक्रममाह याज्ञवल्क्यः। वानप्रस्थयतिब्रह्मचारिणां रिक्थभागिनः। क्रमेणाचार्यसच्छिष्यधर्मभ्रात्रेकतीर्थिनः॥

[615.] वानप्रस्थस्य यतेर्ब्रह्मचारिणश्च क्रमेण प्रतिलोमक्रमेणाचार्यसच्छिष्यधर्मभ्रात्रेकतीर्थिनः रिक्थस्य धनस्य भागिनः॥

[616.] ब्रह्मचारी द्विविधः। उपकुर्वाणो नैष्ठिकश्च॥

[617] उपकुर्वाणस्य धनं मात्रादय एव गृह्णन्ति॥

Digitized by Google

[618.] नैष्ठिकस्य धनमाचार्य इति। तत्र विद्यासंबन्धस्यैव यौनसंबन्धाद्बलीयस्त्वात्॥

[619.] यतेस्तु धनं सच्छिष्या एव गृह्णन्ति॥

[620.] यतिश्चतुर्विधः। कुटीचकबह्वदकहंसपरमहंसभेदात्॥

[621.] कुटीचकबह्वदकहंसानामाचार्याभावे शिष्यस्य धनग्रहः॥

[622.] परमहंसस्य त्वाचार्याभावाच्छिष्य एव गृह्णाति॥

[623.] वानप्रस्थस्य धनं धर्मभ्रात्रेकतीर्थी गृह्णाति॥

एकतीर्थी एकाश्रमी॥

धर्मभ्राता प्रतिपन्नो भ्राता॥ एकगुरुशिष्यतया भ्रातृत्वेन स्वीकृत इत्यर्थः॥

[624.] धर्मभ्राता चासावेकतीर्थी चेति विशेषणसमास इति विज्ञानेशः॥

[625.] अनंशास्त्वाश्रमान्तरगता इति वसिष्ठस्मरणमिच्छया रिक्थसंबन्धो नास्तीत्येवं परं॥

[626.] अह्नो मासस्य षण्णां वा तथा संवत्सरस्य वा। अर्थस्य निचयं कुर्यात्कृतमाश्वयुजे त्यजेदिति वानप्रस्थमधिकृत्योक्तेः। कौपीनाच्छादनार्थं च वा-

Digitized by Google

सांसि बिभृयात्तथा । योगसंभारभेदांश्च गृह्णीयात्पादुके तथेति यतिमधिकृत्योक्तेः । नैष्ठिकस्यापि शरीरयात्रार्थं वस्त्रादिसंबन्धो ऽस्त्येवेति । तद्विभागकथनं युक्तमेवेत्यवगन्तव्यं ॥

[लक्ष्मीधरमतं]

[627.] अथ लक्ष्मीधरमतं ॥

[628.] अत्राह भगवाल्लक्ष्मीधरः । अशेषात्मजहीनस्य मृतस्यासंसृष्टिनो धनं प्रथमं पत्न्यभिगामि । तदभावे दुहितृगामि । तदभावे चकाराद्दौहित्रगामि । तदभावे मातापितरौ हरेयातां । तदभावे भ्रातृगामि । तदभावे तत्पुत्रगामि । तदभावे बान्धवादयो यथाक्रमं गृह्णीयुरिति ॥

[629.] प्रथमं रिक्थस्यात्मवर्गे पत्न्यादौ संक्रमः । तदनन्तरं पितृवर्गे पितृव्यतत्पुत्रादौ संक्रमः । तदनन्तरं पितामहवर्गे आसप्तमं संक्रमः । तदनन्तरं समानोदकेषु । तदभाव आत्मबन्धुषु । तदनन्तरं पितृबन्धुषु । तदनन्तरं मातृबन्धुषु । श्रोत्रियान्तेषु संक्रम इति ॥

[630.] एवं स्थिते पत्न्यनन्तरं दुहितृगामि धनं । तद्दुहितॄणां सापत्यानपत्यतामनपेक्ष्यैव संक्रामति ॥

Digitized by Google

[631.] तथा च दुहितर इति बहुवचनं सार्थकं भवति ॥ अत एव भ्रातर इति बहुवचनमपि सापत्यानपत्यभ्रातृत्वविवेकमनपेक्ष्यैव प्रयुक्तं ॥ अत एव पत्नीत्येकवचनं ॥ सापत्यानपत्यपत्नीद्वयसन्निपाते सापत्यायास्स्थावरं नानपत्यायाः ॥ अत एव तत्सुत इत्यत्रापि भ्रातृसुतानां सापत्यानपत्यानां सन्निपाते सापत्यस्यैव रिक्थग्रहणं ॥ एवमुत्तरत्रापि । सब्रह्मचारिण इति बहुवचनं तु एकवासिनामिवानेकवासिनामप्यादरार्थं ॥

[632.] तच्च दुहितृगामि रिक्थं सप्रतिबन्धमपि दौहित्रसद्भावे दुहितृगामित्वावस्थायामप्रतिबन्धदायतामापद्यते ॥

[633.] चकारेणानुक्तसमुच्चयार्थेन समुच्चितदौहित्रस्यापि समकालमेव स्वत्वप्राप्तिरिति ज्ञापयत्येवकारः ॥

[634.] तथैव भ्रातरस्तथेति तथाशब्दस्तत्सुतपदेनान्वीयमानो यथाशब्दसंबन्धो ऽन्वेति । यत्तदोर्नित्यसंबन्धात् ॥

[635.] तथा चायमन्वयः । पितृगामित्वानन्तरं दायस्य भ्रातृशब्दवाच्यानां तत्सुतानामप्रतिबन्धेनैव



Digitized by Google

दायाधिकारः तथा तत्पुत्रसद्भावे ऽप्यप्रतिबन्ध एव दाय इति ॥

[636.] यत्तु विज्ञानयोगिनोक्तं । पितरावित्येकशेषमहिम्ना पूर्वं मातृगामि धनं तदभावे पितृगामीति ॥ तन्न। बहुवचनवद्विवचनमपि समप्राधान्यस्य द्योतकत्वात्तयोस्तद्विक्ये तुल्यमेव स्वाम्यं । किन्तु पुमां पुंसो ऽधिके शुक्र इति वचनाद्बीजग्रहणानुविधायमंशं गृह्णीयादिति वैष्णववचनानुरोधेन तादृगंशग्रहणस्य न्याय्यत्वमिति सोमशेखरः ॥

[637.] तन्न । तथा सति पितृवर्गे भ्रातृपुत्रान्ते मातुलादिषु मात्रवयवानुवृत्तेस्तत्रैव ग्रहणं स्यात् । न प्रपितामहवर्गे ॥ यथाह भारुचिरेतद्विष्णुवचनव्याख्यानावसरे । बीजशब्दः पिण्डवाचीति ॥ अत्र निर्वाप्य पिण्डान्वय एव विवक्षितः । मातुः पित्रा सापिण्ड्यादुभयोर्ग्रहणं । पितुरेव प्राधान्यं । तदभावे मातुरेवेति ॥

[638.] अयमाशयश्चन्द्रिकाकारोदाहृत वैष्णववचनस्यापीति ध्येयं ॥

[639.] अत्रेदं तत्त्वं । यथा पितृद्रव्ये पुत्राणां दायस्वीकारो प्रतिबन्धः पुत्रः पुत्रत्वेनैव पितृद्रव्य-

Digitized by Google

स्वामी। एवं दुहित्रादिस्थले ऽपि। पुत्रसन्ततिसद्भावे तत्स्वामित्वं तत्पुत्रत्वेनैव। अत उक्तं तत्सुता इति॥

[640.] नन्वत्र तच्छब्देनापुत्रभ्रातैव परामृश्यते। न तु भ्रातृमात्रमिति तत्पुत्रस्याप्रतिबन्धदायार्हता नास्तीति प्रतिभातीति चेत्।

[641.] मैवं। भ्रातृशब्दस्य संबन्धशब्दत्वादपुत्रस्य भ्रातेति गम्यते। भ्रातृपदेन। न तु तत्पदेनापुत्रसंबन्धविशेषणविशिष्टभ्रातृपरामर्शः। तावत्पर्यंतं शब्दतात्पर्यस्याभावात्॥

[642.] न चात्र रिक्थग्राहितयापि तद्भ्रातृसुतानां तत्कृतमृणमपाकरणीयं स्यात्॥ तथात्वे रिक्थग्राह ऋणं दाप्य इति सामान्येन स्मरणं व्याहन्येत॥ न च तथांगीकारःसर्वलोकसिद्धत्वात्तदृणापाकरणस्येति वाच्यं॥ भूतपूर्वगत्या तदीयरिक्थग्राहित्वात्तेषां तदृणमपाकरणीयं॥

[643.] अत्रेदमुपतिष्ठते। वैष्णवं वचनं दौहित्रान्तानामपाये मातापितरौ हरेयातामिति। पत्नीदुहितरश्चेति याज्ञवल्कीयवचनगतचकारानुकृष्टदौहित्रान्तानामभावे मातापितरौ पिण्डानुरोधेन धनं हरेयातां। दौहित्रसंक्रान्त्यनन्तरं तत्पुत्रगाम्येव धनं। न मातापितृगामि॥

Digitized by Google

[644.] अत्रेदं तत्त्वं। सप्रतिबन्धस्थले ऽपि पुत्रसन्ततिसद्भावे ऽप्यप्रतिबन्ध एव दाय इति चकारैवकाराभ्यां याज्ञवल्क्यीयवचनतात्पर्यमवधार्यं ॥

[645.] रिक्थग्राह ऋणं दाप्य इति वचनबलाद्दास्तवं रिक्थग्राहित्वमवलंब्य तदृणसंशोधनं न्याय्यं। स्वाम्यं त्वप्रतिबन्धमेव ॥

[646.] अतश्च दौहित्रस्याप्रतिबन्धो दायग्रहणे न दुहितुः। यदि दुहितुरपि स्याद्दौहित्रसंक्रांतं रिक्थं तदभावे मातापितृगामि स्यात्। तच्च सर्वविद्वद्संमतं ॥ सन्ततिहीनाया दुहितुः पुत्रिकारूपसन्ततिहीनाया वा रिक्थसंक्रान्तौ तन्मृत्यनन्तरं तद्दुहितृर्वा तज्ज्ञातीन्वा तद्रिक्थं प्राप्नुयात्। तच्च न्याय्यं न भवति ॥

[647.] तथा च स्मर्यते। अपुत्रायाश्च दुहितुः पितृरिक्थं हरन्ति ते। पितृभ्रातृसुताद्याश्च गोत्रजा नैव बान्धवा इति ॥

बान्धवा मातुलादयः पितृस्वस्रेयादयश्च ॥

[648.] तथा च विष्णुः। अनपत्यारिक्थं न बान्धवगामीति ॥

[649.] अयमर्थः। अनपत्यानां स्त्रीणामनपत्यस्य वा रिक्थं सप्रतिबन्धो दायः सगोत्रज्ञातीनेव संक्रा-

Digitized by Google

मति न त्वनपत्यानां पुत्रिकासन्ततियुक्तानां वा दुहितॄणां ज्ञातीन् । तेषां सगोत्रताभावादिति ॥

[650.] अत एव पत्नीविषये हारीतः । अपुत्रा शयनं भर्तुः पालयन्ती व्रते स्थिता । भुञ्जीतामरणं क्षान्ता दायादा ऊर्ध्वमाप्नुयुरिति ॥

[651.] अत्रापुत्राया इति स्मृतेरनपत्यरिक्थं न बान्धवगामीति स्मृतेरपुत्रानपत्यशब्दयोरेकार्थत्वांगीकाराद्दुहितुरपि पुत्रिकासन्ततिसहितायास्तद्दुहित्रनन्तरं तत्पुत्रिकागामि न भवति तद्वनमिति ॥

[652.] अत एवाह स एव । न पुत्रिकागामि न बान्धवगामि किन्त्वपुत्रस्य रिक्थिनो ज्ञातयो धनं हरेयुरिति ॥

[653.] अत्र केचिदाहुः । पत्नीदुहितरश्चैवेत्यत्र चकारेणानुकृष्टो दौहित्रः । एवकारेणावधारणार्थेनावधारितः ॥ अतश्च दौहित्रगाम्यपि धनं दौहित्राभावे मातापितृगाम्येव न तत्पुत्रगामीति ॥

[654.] तन्न सहन्ते वृद्धाः ॥ दौहित्रगामि धनं दौहित्राभावे तत्पुत्रगाम्येवेति त्रैविद्यव्यवहारसिद्धं ॥

[655.] अतश्च दुहितृगामि सत् । दौहित्रमेव संक्रान्तं । तत्सुतसंभवे तमेव कटाक्षीकरोति तद्रिक्थं ॥

[656.] इयांस्तु विशेषः । दौहित्रान्तानामभावे

Digitized by Google

दौहित्रपुत्रं न संक्रामति। किन्तु ततोऽप्यन्तरंगत्वा-न्मातापितरावेवावलंबते रिक्थं॥

[657.] नन्वेवं दुहित्रभावे तत्संक्रान्त्यभावाद्दौहित्र-संक्रान्तेर्मातापितृसंक्रान्तेरासन्नत्वाद्दुहित्रनन्तरं माता-पितरावेवावलंबतामिति चेत्।

[658.] मैवं। दौहित्रस्य मातापितृतोऽपि प्रत्या-सत्तिरस्ति॥

[659.] अपुत्रपौत्रसन्ताने दौहित्रा धनमाप्नुयुः। पूर्वेषां तु स्वधाकारे पौत्रादौहित्रका मता इति विष्णुवचनं॥

[660.] अकृता वा कृता वापि यं विन्देत्सदृशं सुतं। पौत्री मातामहस्तेन दद्यात्पिण्डं धनं हरेदिति मनुवचनं॥

[661.] अत्राकृता वेति दृष्टान्तार्थं। कृतायाः पुत्रिकायाः सुतस्य पुत्रत्वेनार्धांशभागित्वादप्रतिबन्ध-दायहरत्वस्योक्तेः॥ यथा कृतायाः पुत्रेण मातामहः पौत्री तथाकृताया अपिपुत्रेणेति॥

[662.] अनेन कुर्यान्मातामहश्राद्धं नियमात्पु-त्रिकासुत इत्यपिपरास्तं। पुत्रिकासुतस्य पुत्रमध्ये पाठात्॥

पत्नीपौत्र एव पुत्रिकासुतशब्दवाच्य इति॥

Digitized by Google

[663.] अनयोर्मानववैष्णवयोर्वचनयोस्तात्पर्य-वर्णने विवदन्ते वृद्धाः ॥ दौहित्रस्य मातामहश्राद्धं सकारणमेव पितृश्राद्धवन्निष्कारणं न भवतीति ॥

[664.] तथा हि। यो यत आददीत स तस्मै श्राद्धं कुर्यादिति विष्णुस्मरणात्। श्राद्धं मातामहानां त्ववश्यं धनहारिणा। दौहित्रेणार्थनिष्कृत्यै कर्तव्यं विधिवत्सदेति व्यासस्मरणात्। धनग्रहणनिबन्धनं दौहित्रस्य मातामहश्राद्धकरणमिति ॥

[665.] यत्तु पुलस्त्येनोक्तं। मातुः पितरमारभ्य त्रयो मातामहास्स्मृताः। तेषां तु पितृवच्छ्राद्धं कुर्युर्दुहितृसूनव इति तत्तु पितृश्राद्धेनानुशिष्टमातामहश्राद्धविषयमित्यवगन्तव्यं ॥

[666.] यथोक्तं पितामहेन। पितरो यत्र पूज्यन्ते तत्र मातामहा अपि। अविशेषेण कर्तव्यं विशेषान्नरकं व्रजेदिति ॥

[667.] व्यासोऽपि। पितॄन्मातामहांश्चैव द्विजश्श्राद्धेन तर्पयेत्। अनृणस्स्यात्पितॄणां तु यज्ञानां लोकमृच्छतीति ॥

[668.] स्कान्दपुराणेऽपि। कृत्वा तु पैतृकं श्राद्धं पितृप्रभृतिषु त्रिषु। कुर्यान्मातामहानां च तथैवानृण्यकारणादिति ॥

Digitized by Google

[669.] यत्तूक्तं। कुर्यान्मातामहश्राद्धं नियमात्पुत्रिकासुतः। उभयोरर्थसंबन्धः कुर्यात्स उभयोः क्रियामिति ॥

[670.] अत्र केचिदाहुः। द्विविधो हि पुत्रिकापुत्रः। एको मातामहसंबन्धः। अपरः पितृमातामहसंबन्धः मातामहसंबन्धेन मातामहश्राद्धं कर्तव्यं। उभयसंबन्धेनोभयोः क्रियाः कार्या इति ॥

[671.] अयमाशयः। पुत्रिकायास्सुत इति षष्ठीसमासाश्रयणे पुत्रिकासुत इति कर्मधारयसमासाश्रयणे तु तस्य पितामहशब्दवाच्यत्वात्। अस्यां यो जायते पुत्रस्स मे पुत्रो भविष्यतीति परिभाषावशात्पुत्रिकापुत्रस्य मातामहसंबन्धः। इतरस्य तूभयसंबन्धित्वमिति ॥

[672.] अत्रोच्यते। दौहित्रस्य मातामहश्राद्धे पुत्रवदधिकार इत्याह विष्णुः। दौहित्रस्य मातामहश्राद्धं निष्कारणमिति ॥

कारणं रिक्थग्रहणात्मकं ॥

[673.] दौहित्रस्य मातामहश्राद्धे नित्यवदधिकार इत्यर्थः ॥

[674.] अत्र भारुचिः। निष्कारणमिति वदता

Digitized by Google

विष्णुना भंग्यन्तरेण समनन्तरकर्तॄणां पुत्रादीनां विद्यमानत्वे दौहित्रस्य न कर्तृत्वसंक्रान्तिरिति ॥

अत्रादिशब्देन पत्नी विवक्षिता ॥

[675.] यद्यप्यग्निविद्यासाध्यकर्मसु स्त्रीणामनधिकारः तथापि पत्न्येव दद्यात्तत्पिण्डं कृत्स्नमंशं लभेत चेत्येवमादिवचनबलात्तत्र तासामधिकारः ॥

[676.] तथा च गौतमः। नित्यवदधिकारो दौहित्राणां मातामहश्राद्ध इति ॥

नित्यवदिति स्वार्थे वतिः ॥

[677.] अतश्च। अकृता वा कृता वापि यं विन्देत्सदृशं सुतं। पौत्रो मातामहस्तेन दद्यात्पिण्डं धनं हरेदिति ॥ पत्नीशब्दवाच्यभार्या पुत्रिकासुतविषयं पुत्रिकाकरणपुत्रिकासुतविषयं च वेदितव्यं॥

[678.] नन्वेवमकृता वा कृता वेत्यादिवचनं पुत्रिकाकरणविषयं कृतेति पदेनाकृतेति पदेन तु गान्धर्वादिविवाहोढा पुत्रिकाविषयं। पौत्री मातामहस्तेनेति वचनसामर्थ्यात्। पौत्रत्वमुभयोरेव। पुत्रिकायाः पुत्रत्वात्तत्पुत्रस्य पौत्रत्वात्॥ गान्धर्वविवाहे मातामहसापिण्ड्यसगोत्रत्वयोरनिवृत्तेः तत्र पौत्रत्वमिति तयोरेव मातामहश्राद्धे नित्यवदधिकारः। न दौहित्रमात्रस्येति चेत्।



Digitized by Google

[679.] मैवं। दद्यात्पिण्डं धनं हरेदिति धनहरणस्य पत्नीमूलकत्वात्पत्नीपदेन यज्ञसंयोगप्रतिपादकेन गान्धर्वादिविवाहोढा पर्युदासात्तत्पौत्राणां दूरत एव पत्नीमूलकधनग्रहणमिति ॥ किञ्च पौत्रीति सामर्थ्यं गान्धर्वादिविवाहोढा पुत्रिकापुत्रेऽपि नास्ति। तस्य दौहित्रत्वादुपचार एव। अतः पूर्वोक्तमेव सम्यक् ॥

[680.] नन्वेवं यो यत आददीत स तस्मै श्राद्धं कुर्यादिति वैष्णवं वचनं दौहित्रस्य मातामहश्राद्धं निष्कारणमिति च वैष्णवमेवोभयोर्विरोध इति चेत्।

[681.] मैवं। अत्र भगवतो भारुचेर्मतमवतिष्ठते। यश्श्राद्धाधिकारी यतो यस्मात्सकाशाद्धनमादद्यात्तेन मिलितेन द्रव्येण तस्मै तदर्थं तत्प्रतिनिधिर्भूत्वा कुर्यादिति ॥

[682.] अयमाशयः। बहुपुत्रस्थले बहुदौहित्रस्थले पितुर्मातामहस्य वौर्ध्वदैहिकक्रियाणां मध्ये नवश्राद्धषोडशश्राद्धानां निष्पादने न बहूनामधिकारः किंत्वेकस्यैवेति प्रकरणसामर्थ्यादुक्तं भारुचिनेति ध्येयं ॥

[683.] सोमेश्वरस्तु वचनस्याभिधानशक्त्या प्रकरणं बाधित्वा यो यत आददीत स तस्मै श्राद्धं कुर्यादिति वचनं पुत्रदौहित्रव्यतिरिक्तरिक्थग्राहविषयमित्याह॥

Digitized by Google

[684.] एतच्च समनन्तरमेवोक्तं विष्णुना । उद्धृ-तद्रव्यादेकेनैव शक्तेन श्राद्धषोडशकं कार्यमिति ॥

षोडशश्राद्धग्रहणं नवश्राद्धानामुपलक्षकं ॥

[685.] तथा च गौतमः । समुदितद्रव्येण नव-श्राद्धं षोडशकं च कुर्यादिति ॥

[686.] चकारः पन्थापरिव्ययणं समुच्चिनोति ॥ समुदितशब्देन ज्ञायत एकस्यैवाधिकारो नानेकेषा-मिति ॥

[687.] विष्णुवचने शक्तिपदं सामर्थ्यमधिकारं च गमयति ॥

[688.] तथा चायमर्थः । एकशब्दो मुख्यवाची । मुख्यो ज्येष्ठः । अधिकृतश्चेत्स एवाधिकारी । अन्यथा समनन्तरन्यायसिद्धार्थः ॥ शक्तो दृढांगः । एकः दौ-हित्राणां मध्ये स एवाधिकारीति ॥

[689.] अस्मिं प्रकरणे पतितत्वाद्यो यत आद-दीतेति वचनमेतदनुरोधेन व्याख्यातं भारुचिना ॥ न्यायनिष्ठेन भगवता सोमेश्वरेण न्यायतः प्रकरण-मुल्लंघितमिति ध्येयं ॥

[690.] अतश्च यानि रिक्थग्राहकर्तृकपराणि श्राद्धं मातामहानां त्ववश्यं धनहारिणेत्यादीनि तानि षो-डशश्राद्धविषयाणीति ध्येयं ॥

Digitized by Google

[691.] श्राद्धं मातामहानां त्ववश्यं धनहारिणा दौहित्रेणार्थनिष्कृत्यै कर्तव्यं विधिवत्सदेति ॥ सोमेश्वरभारुचिमतावलंबनेनायमस्यार्थः ॥

[692.] अर्थशब्देन प्रयोजनमुद्देश्यं । ऋणमिति यावत् । तस्य निष्कृत्यायानृण्याय ॥

[693.] बहुषूपप्लवमानेषु दौहित्रेष्वेक एव शक्तः धनहारी। धनं हृत्वाहृतद्रव्येण षोडशश्राद्धनवश्राद्धानि पन्था परिव्यायणं च कुर्यात् ॥ पुत्रेष्वसन्निहितेष्वविद्यमानेषु पत्न्यामविद्यमानायां समनन्तरकर्तृषु विद्यमानेष्वितरस्य व्यवहितकर्तुरधिकारनिषेधात्॥

[694.] तथा च विष्णुः। सति कर्तर्यन्यस्य कर्तृत्वं समनन्तरकर्तर्यनन्तरकर्तृत्वं न स्मृतं ॥

श्राद्ध इति शेषः ॥ संस्कारकर्मणीति केचित् ॥

[695.] तथा च व्यासः। पितॄन्मातामहांश्चैव द्विजश्श्राद्धेन तर्पयेत् । अनृणस्स्यात्पितॄणां तु यद्ब्रह्मलोकं समृच्छतीति ॥

[696.] अत्रानृण्यं त्रिभि ऋणावाजायते। ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्य इति प्रथितं च दौहित्रस्यापि पौत्रवन्मातामहप्रजारूपत्वेन सिद्धं । नान्यथा ॥

[697.] दुहितुस्त्वग्निविद्यासाध्यकर्मण्यनधिका-

Digitized by Google

राद्दौहित्रस्यैव तदधिकार इति दुहितृद्वारा दौहित्रसंपादनादानृण्यं मातामहस्य ॥

[698.] अत एव पौत्राद्दौहित्रस्य व्यवधानं ॥

[699.] अत एव पौत्रवद्दौहित्रस्य साक्षादप्रतिबन्धेन दायस्वीकारार्हता नास्ति । किन्तु दुहितृद्वारा ॥

[700.] अतो दौहित्रोपीषत्कल्पः पौत्र एवेति । तस्याप्यानृण्यं पुत्रवन्मातामहौर्ध्वदैहिकक्रियाकरणात्स्येत्स्यति ॥

[701.] अत एव श्रुतिः । दुहिता पुत्रकल्पा च पौत्रा दौहित्रकास्स्मृता इति ॥

[702.] न चैषा पुत्रिकाकरणविषयेति शंकनीयं । कल्पप्रत्ययानन्वयात् ॥ पुत्रिकाकरणे पुत्रिकैव पुत्रः न पुत्रकल्पता पुत्रिकायाः ॥

[703.] अत एवेषत्कल्पपुत्रः पुत्रिकेषत्कल्पपौत्रो दौहित्र एवेति सिद्धं ॥

[704.] यत्तु सन्नियोगशिष्टमातामहश्राद्धप्रतिपादकं वचनं । पितरो यत्र पूज्यन्ते तत्र मातामहा अपि । अविशेषेण कर्तव्यं विशेषान्नरकं व्रजेदिति तत्तु जीवपुत्राजीवपुत्रमातामहद्वयसाधारणं ॥

[705.] तथा च याज्ञवल्क्यः । द्वौ दैवे प्राक्त्रयः पित्र्य

Digitized by Google

उद्गेकैकमेव वा । मातामहानामप्येवं तन्त्रं वा वैश्वदेविकमिति ॥

[706.] कुर्यान्मातामहश्राद्धं नियमात्पुत्रिकासुत इत्यादि वचनमेतद्वचनानुरोध्येव ॥

[707.] विज्ञानयोगिप्रभृतयस्तु सन्नियोगशिष्टं श्राद्धं मातामहोद्देश्यं पाक्षिकमित्याहुः ॥

[708.] अतश्च दौहित्रस्य मातापितृतो ऽपि दृष्टादृष्टोपकारकतया प्रत्यासत्त्यतिशयात्तद्गाम्येव धनमिति सिद्धं ॥

[709.] एतच्च लक्ष्मीधराचार्यमतमतिगम्भीरं दिङ्मात्रमुदाहृतं ॥

## [संसृष्टधनविभागः]

[710.] अथ पत्नीदुहितरन्यायस्यापवादमाह विष्णुः । संसृष्टधनं न पत्न्यभिगामीति ॥

[711.] अत्र भारुचिः । अविभागदशायामिव संसर्गदशायामपि धन अनेकपुरुषस्वत्वसमावेशादेकपुरुषापायेन तत्स्वत्वनिवृत्तावपि पुरुषान्तरस्वत्वानां तथैवावस्थानात्को गृह्णीयादित्यपेक्षाया अनुत्थानात्तादृगपेक्षोपनिपातिनः पत्नीदुहितरन्यायस्य बाधकत्वेनास्य संसृष्टिन्यायस्यावतार इति ॥

Digitized by Google

[712.] अयं भावः। विभागोत्तरकालं पुनर्द्रव्याणि मिश्रीकृत्य संसारयात्रायामनुवर्त्यमानायां प्राप्नुवन्नुपचयो ऽपचयो वा यथा जातो ऽनुभाव्य इति संविदं कृत्वा संसर्गे प्रवृत्तेः पाक्षिकापचयभाराभ्युपगमसाहसशालित्वं संसृष्टिन्याय इति ॥

[713.] एवमनेन न्यायेन संसृष्टिनां पत्नीदुहितृपेक्षया तत्क्रमपतितासंसृष्टिपित्राद्यपेक्षया च प्राबल्यमिति नैयायिको ऽयं संसृष्टिनां स्वत्वसंक्रमक्रमः॥

[714.] संसृष्टी नाम विभक्तद्रव्यं विभक्तेनैव द्रव्यान्तरेण पुनर्मिश्रीकृतं संसृष्टं। तदस्यास्तीति संसृष्टी॥

[715.] तस्यापुत्रस्य धनमितरस्संसृष्टी गृह्णीयान्न पत्न्यादिरित्यर्थः ॥

[716.] संसृष्टित्वं न सर्वेषां। अपि तु पितृभ्रातृपितृव्याणामेव ॥

[717.] तथा च बृहस्पतिः। विभक्तो यः पुनः पित्रा भ्रात्रा वैकत्र संस्थितः। पितृव्येणापि वा प्रीत्या स तत्संसृष्ट उच्यत इति ॥

[718.] विष्णुरपि। पितृव्यपितृभ्रातृभिरेव संसर्गो नान्यैरिति ॥

[719.] अत्र भारुचिः। वैकल्पिको ऽयं संसर्गविधिरिति ॥

Digitized by Google

[720.] अयमर्थः । पितृव्येण वा पित्रा वा भ्रातृभिर्वा स्वरुच्या संसर्गः । पितृव्येणाथ वा प्रीत्येति प्रीतिपदस्मरणादिति ॥

[721.] अत एव संभूयसमुत्थानेऽप्येतस्यान्तर्भावो नास्ति ॥ तत्र पत्नीदुहितरन्याय एवावतरति । संभूयकारिणां मध्ये मृतस्य पत्न्यादिरेव तद्धनांशभागिति विष्णुस्मरणात् ॥

[722.] अयमर्थः । पितृव्यपितृभ्रातृभिरेव संसर्गो नान्यैरिति संसृष्टधनं न पत्न्यभिगामीति च विष्णुस्मरणं पत्नीदुहितरन्यायस्य बाधकं सत् । नियामकं पित्रादिभिरेव संसर्गो नान्यैरिति ॥ अतस्संभूयकारिणामयं न्यायो नावतरतीति ॥

[723.] अत्र विशेषमाह विष्णुः । संसृष्टीनां पिण्डकृदंशहारीति ॥

[724.] अत्र भारुचिः । पिण्डदोंऽशहरश्चैषामित्यत्र पिण्डदत्वमेवांशग्रहणे प्रयोजकमिति ॥

[725.] अयं भावः । पिण्डदोंऽशहरश्चैषामिति पाठक्रमादर्थक्रमो बलीयानित्यंशहरत्वमेव पिण्डदत्वप्रयोजकमिति सकलस्मृतिसिद्धं ॥

[726.] तथाप्यत्र संसृष्टिस्थले पाक्षिकापचयभाराभ्युपगमसाहसशालित्वरूपन्यायस्य पिण्डदत्वरूपा-

Digitized by Google

न्तरंगन्यायो बाधक इति प्रदर्शनमात्रपरमित्युक्तं । न तु वस्तुवृत्त्या पिण्डदत्वमंशग्रहणप्रयोजकमिति ॥

[727.] अतोऽस्मिं प्रकरणे संसृष्टिन्यायान्तरंगन्यायौ यथार्हं प्रवर्तेते॥ अतश्च क्वचित्संसृष्टिन्यायेन संसृष्टिन एव धनग्राहित्वं । क्वचिदन्तरंगन्यायेन संसृष्टिन एव धनग्राहित्वं । क्वचित्त्वन्तरंगन्यायेनैवासंसृष्टिन एव धनग्राहित्वमुक्तं ॥

[728.] एवं त्रैविध्ये ऽपि न पत्न्यादिर्धनग्राहीति प्रतिपादनान्न्यायफलं सिद्धं ॥

[729.] अतश्च संसृष्टिनो ऽपुत्रस्याभ्रातृकस्यापितृकस्य धनं पितृव्यगाम्येवेति विष्णुवचनस्यार्थः ॥

[730.] अत एव याज्ञवल्क्यः । संसृष्टिनस्तु संसृष्टीति ।

[731.] यत्र पुनः पितृव्यसोदरौ संसृष्टौ तत्र संसृष्टधनं सोदरगाम्येव न पितृव्यगामीत्याह याज्ञवल्क्यः। सोदरस्य तु सोदर इति ॥

[732.] सोदरस्य संसृष्टस्य धनं सोदर एव गृह्णीयात् । संसृष्टिपितृव्यादिस्तु संसृष्टो ऽपि न गृह्णीयात् । तस्यैव तत्पिण्डदानाधिकारादिति वचनार्थः ॥

[733.] संसृष्टिनो मरणानन्तरं जातस्य पुत्रस्यै-



Digitized by Google

वांशो दातव्यः । न गृहीतव्य इत्याह याज्ञवल्क्यः । दद्याच्चापहरेच्चांशं जातस्य च मृतस्य चेति ॥

[734.] यत्र पुनः भिन्नोदरा भ्रातरः केचनसंसृष्टाः। सोदरभ्रातरो न सन्ति पितृव्यादयो ऽपि संसृष्टास्तत्र भिन्नोदरभ्रातृगाम्येव धनमित्याह याज्ञवल्क्यः। अन्योदर्यस्तु संसृष्टी नान्योदर्यधनं हरेदिति ॥

असंसृष्टीति शेषः ॥

[735.] यथाह विष्णुः । भिन्नोदराणां संसृष्टिनो गृह्णीयुः ॥

[736.] अत्र भारुचिः । भिन्नोदराणामिति निर्धारणे षष्ठी । भिन्नोदराणां मध्ये संसृष्टिन एव धनं गृह्णीयुः ॥

[737.] अयं भावः। यद्यपि भिन्नोदराणां संसृष्टिनामसंसृष्टिनां तत्पिण्डदाने ऽधिकारस्तुल्य एव । पिण्डदाने ज्येष्ठकनिष्ठत्वादिविवेकानपेक्षतयाधिकारस्य तुल्यत्वादित्युक्तेः । पिण्डदानाधिकाररूपान्तरंगन्यायतौल्ये ऽपि पाक्षिकापचयभाराभ्युपगमसाहसशालित्वरूपन्यायस्य विद्यमानत्वात्तच्चैव धनग्राहित्वमिति न काचिदनुपपत्तिः ॥

[738.] ननु पित्रा भ्रात्रा पितृव्येण च संसृष्टधनं न पितृगामि नापि पितृव्यगाम्यपि तु भ्रातृगाम्ये-

Digitized by Google

वेत्युक्तं ॥ एवं च सति वाचनिकस्वत्वसंक्रमस्स्यात् । न नैयायिक इति प्रागुक्तं विरुध्यात् ॥ अतस्संसृष्टिविषये ऽपि पित्राद्यपेक्षया भ्रातुः प्राथम्ये न्याय एव वक्तव्यः ॥

[739.] उच्यते । उक्तं तावद्विभक्तानां पुनस्संसर्गे प्रवृत्तिः । पाक्षिकापचयभाराभ्युपगमसाहसपूर्विकेति । भ्रातॄणामेव च संसर्गे प्रवृत्तिस्तादृशी । न पितुः । पितापुत्रयोरसत्यपि संसर्गे ऽन्यतरापचयनिबन्धनापचयसंक्रान्तेरवर्जनीयत्वेन कृताकृतप्रसंगित्वात् ॥

[740.] श्रूयते ऽपि तथा पिता पुत्रं क्षित उपधावति । यथा पुत्रः पितरं क्षितक्षित उपधावतीति च ॥ अतो भ्रातॄणामेव संसर्गे प्रवृत्तिः । पाक्षिकापचयभाराभ्युपगमसाहसपूर्विकानपितुरिति । भ्रातृप्राथम्यं नैयायिकमेव ॥

[741.] नन्वेवं पुत्राद्विभक्तस्य पितुस्स्वभ्रातृभिः संसृष्टस्य मरणे तद्धनं संसृष्टभ्रातृगाम्येव स्यात् । न पुत्रगामि ॥

[742.] मैवं । पत्नीदुहितरन्यायवत्संसृष्टन्यायस्याप्यपुत्रविषयत्वात् ॥

[743.] यथाह संसृष्टिप्रकरणे नारदः । भ्रातॄणामप्रजाः प्रीयात्कश्चिच्चेत्प्रव्रजेत वेति ॥

Digitized by Google

[744.] देवलो ऽपि। ततो दायमपुत्रस्य विभजेरं सहोदरा इति ॥

[745.] शंखो ऽपि। अपुत्रस्य स्वर्यातस्य भ्रातृगामि द्रव्यमिति ॥

[746.] पुत्रो विद्यमानो विभक्तो न संसृष्ट इत्युक्तो ऽयमिति चेत् ॥

[747.] तत्किमसंसृष्टपुत्रो न पुत्रः। पुत्रस्य हि पुत्रत्वेनैव प्राबल्यं न संसृष्टत्वेनाविभक्तत्वेन वा। अंगादंगात्संभवदसीति मन्त्रवर्णेन तस्यात्मतया निरूपितत्वात्। धनस्वामिनो मृतस्यात्मभूते तस्मिं वर्तमाने सत्यन्यस्य तद्धनग्राहित्वशंकानुदयात् ॥

[748.] एवं च यथा विभक्तो ऽपि पुत्रः पुत्रत्वेनैव पत्न्याद्यपेक्षया प्रबलः। तथैवासंसृष्टो ऽपि पुत्रः पुत्रत्वेनैव संसृष्टिभ्रात्रपेक्षया प्रबल इति तद्गाम्येव धनं ॥

[749.] ननु पितृव्यादिभिस्संसृष्टस्य पितुर्धनं पुत्रैकनियतमित्युक्ते किमर्थं संसर्गः पित्रा तद्भ्रात्रादीनामिति चेत्।

[750.] उच्यते। जीवद्दशायामुपचयार्थमेव संसर्गविधानं। न तु भाविमरणाभिसन्धिना ॥ अतो मरणानन्तरं न्यायतो विविच्यमानं स्वत्वं यत्र पर्य-

Digitized by Google

वसितं स्यात्तदेव ग्राह्यमिति मृते पितरि संसृष्टिनि तत्संसृष्टैः पितृव्यादिभिः संसृष्टिदशायां भुक्तावशिष्टं धनमपाकृतावशिष्टमृणं पुत्रैरेव विभक्तैरप्यसंसृष्टिभिरपि स्वीकार्यमिति न कश्चिद्विरोधः ॥

[751.] अन्तरंगन्यायेनासंसृष्टिनामेव धनग्राहित्वमाह याज्ञवल्क्यः । असंसृष्ट्यपि चादद्यादिति ॥

[752.] अपिशब्देन सोदरस्य तु सोदर इत्यत्र सोदर अनुकृष्यत इति भारुचिः ॥

[753.] लक्ष्मीधरस्त्वपिशब्देन संसृष्टो नान्यमातृज इत्यन्यमातृजपदसामर्थ्यात्सोदर एव समुच्चीयत इत्याह ॥

[754.] तदयमर्थः । संसृष्टिनो धनमसंसृष्टस्सोदर एव गृह्णीयात् । अन्यमातृजस्तु संसृष्टो ऽपि न गृह्णीयात् ॥ असंसृष्टिनस्सोदरस्य पाक्षिकापचयभाराभ्युपगमसाहसशालित्वाभावे ऽपि तत्पिण्डदानाधिकारस्तस्यैवेति तदुक्तिः ॥

[755.] अनेनैव न्यायेन एकोदराणामपि संसृष्टस्य मध्यमस्य मरणे कनिष्ठस्यासंसृष्टिनस्तदौर्ध्वदैहिकाधिकारात्संसृष्टिज्येष्ठस्य विद्यमानत्वे ऽपि तस्य न मध्यमांशभागित्वमिति ध्येयं ॥

[756.] अत्र केचिदाहुः । असंसृष्ट्यपि वादद्या-

Digitized by Google

त्संसृष्ट इति संसृष्टपदं सोदरवाचि। संसृष्टधनवद्वाची-त्यर्थद्वयमाहुः॥

[757.] अवसिते तात्पर्ये संसृष्टपदमावृत्त्या वाक्यद्वये ऽप्यन्वितमस्तु। वाक्यभेदे च विरूपार्थता न दोष इति विज्ञानयोगिनो मतमिति॥

[758.] ननु पित्रा संसृष्टानां पुत्राणां धनग्राहित्वं। असंसृष्टानां पुत्राणां पितृधनग्राहित्वं नास्ति। यथा विभक्तजपुत्रस्य पितृधनग्राहित्वं नान्येषां पुत्राणामिति॥

[759.] मैवं। विभक्तेषु सुतो जातस्सवर्णायां विभागभाक्। ऊर्ध्वं विभागाज्जातस्तु पित्र्यमेव धनं हरेदिति॥ पुत्रैस्सह विभक्तेन पित्रा यत्स्वयमर्जितं। विभक्तजस्य तत्सर्वमनीशाः पूर्वजास्स्मृता इत्यादिवचनशतेभ्यः विभक्तजस्य पितृधनग्राहित्वं प्रतीयते। एतादृशं संसृष्टस्य पुत्रस्य पितृधनप्रापकं वचनमेकमपि न दृश्यते॥

[760.] नन्वेवं विभक्तजस्य पितृधनस्वामित्वं वाचनिकं स्यादिति पूर्वोक्तं विरुध्यादिति चेत्।

[761.] मैवं। अत्र विभागो वाचनिकः॥ विभागे धर्मवृद्धिस्स्यादित्यादिवचनैर्धर्मवृद्धिकामानां वि-

Digitized by Google

भागः कार्य इति विभागस्य वाचनिकत्वप्रतीतेः ॥ अतो विभक्तजस्य पितृद्रव्यस्वामित्वं नैयायिकं ॥

[762.] तथा हि । विभक्तजस्य पितृद्रव्यस्वीकारसमये इतरे विभक्ताभ्रातरो द्रव्यसममंशं स्वयमपि यदि गृह्णीयुस्तदा विभक्तजस्याल्पीयानेव भागस्स्यादिति विषमविभागस्स्यात् । तद्दोषपरिजिहीर्षया यदि ते सर्वे विभक्तजेन साधं पुनर्विभागं कुर्युस्तदा पूर्वविभागस्य पितृकृतस्यानर्थक्यं स्यात् ॥ भ्रातरस्संसृष्टांशमपयुत्य । संसृष्टिनो दत्वा । पितृद्रव्यमेव गृह्णीयुरिति ॥

[763.] अतो युक्तं संसृष्टिनामसंसृष्टिनां पुत्राणां पितृद्रव्ये तुल्यमेव स्वाम्यमिति ॥

[764.] तदेवाभिप्रेत्याह भारुचिः । संसृष्टानामसंसृष्टानां पुत्राणां पितृकृतर्णापाकरणं तुल्यतया न्याय्यमिति ॥ पित्रर्जितद्रव्यस्याधिक्ये लोभाद्विभागापेक्षायामप्यपचयभारसहिष्णुत्वाभावात् । अपचये सत्यप्रवृत्तेर्विभागो नास्ति । किन्तु विभक्तजस्यैव पितृद्रव्यमिति पितृधनग्रहणे मनुवचनं ज्ञापकमित्याहुः ॥

[765.] यथाह मनुः । संसृष्टास्तेन ये वा स्युर्विभजेत स तैस्सह ।

Digitized by Google

[766.] अस्यार्थः । ये च विभक्ताः पित्रा सह संसृष्टास्तैस्सार्धं पितुरूर्ध्वं विभक्तजो विभजेत् । असंसृष्टैस्तु भ्रातृभिस्सह विभक्तजस्य न विभाग इति तात्पर्यार्थ इति ॥

[767.] यत्तु मनुनैवोक्तं । संसृष्टिविभागं प्रक्रम्य । एषां ज्येष्ठः कनिष्ठो वा हीयेतांशप्रदानतः म्रीयेतान्यतरो वापि तस्य भागो न लुप्यते ॥ सोदर्या विभजेयुस्तं समेत्यसहितास्समं । भ्रातरो ये च संसृष्टा भगिन्यश्च सनाभय इति ।

[768.] तद्विज्ञानयोगी व्याचष्टे । एषां भ्रातृणां संसृष्टिनां मध्ये ज्येष्ठः कनिष्ठो मध्यमो वांशप्रदानतो ऽंशप्रदाने । सार्वविभक्तिकस्तसिः । विभागकाल इति यावत् । हीयेत स्वांशाद्भ्रश्येत । आश्रमान्तरपरिग्रहेण वा ब्रह्महत्यादिना वा मरणेन वा । तदा तस्य भागो न लुप्यते ॥ अतः पृथगुद्धरणीयो न संसृष्टिन एव गृह्णीयुरित्यर्थः ॥ तस्योद्धृतस्य विनियोगमाह । सोदर्या विभजेयुस्तमिति ॥ तमुद्धृतं भागं सोदर्यास्सहोदरा असंसृष्टा अपि। समेत्य देशान्तरगा अपि समागम्य । सहितास्संभूय। समं । न्यूनाधिकभावरहितं ॥ ये च भ्रातरो भिन्नोदराः संसृष्टाः

ते च सनाभयो भगिन्यश्च विभजेयुः ॥ समं विभज्य गृह्णीयुरित्यर्थ इति ॥

[769.] तदयमर्थः। भिन्नोदरसंसृष्टिनामपचयभारसहिष्णुत्वमंशग्रहणे निमित्तं। एकोदराणां तु पिण्डदानाधिकारनिबन्धनान्तरंगन्याय एवांशग्रहणे निमित्तं। उभयनिमित्तं संसृष्ट्येकोदराभावे वेदितव्यं॥ भगिनीनां तु संसृष्टधनविभागसमये दायभागसमय इव किञ्चित्किञ्चित्प्रीत्या देयं न तु विभागः। तासां तु संसर्गाप्रसक्तेः । प्रसक्तानामेव विभागः ॥ अतश्च भिन्नोदराणां संसृष्टानामसंसृष्टानामेकोदराणां समविभाग इति सिद्धं ॥

[770.] अपरार्कचन्द्रिकाकारादयस्तु ससृष्टापुत्रद्रव्यं प्रथमतो भ्रातृगामि। तदभावे पितृगामि। तदभावे वृत्तस्यपत्न्यभिगामीति शंखोक्तवाचनिकक्रमेण पत्नीदुहितर इति नैयायिकक्रमो बाध्यते। अतश्च सोदर्या विभजेयुस्तमिति वचनं क्रमपरमित्याहुः ॥

[771.] तन्न। शंखोक्तक्रमस्य नैयायिकत्वं प्रतिपादितं प्राक् ॥

[772.] शंखवचने पत्नीग्रहणं संसृष्टधनविभागसमये पत्न्या अपि भगिनीनामिव यत्किञ्चिद्देयमिति ध्येयं ॥



Digitized by Google

[773.] अतश्च भारुचिविज्ञानयोगिमतमेव सम्यक्॥

[सर्वविभागशेषः]

[774.] अथ सर्वविभागशेषः किञ्चिदुच्यते॥

[775.] यथाह मनुः। ऋणे धने च सर्वस्मिं प्रविभक्ते यथाविधि। पश्चादृश्येत यत्किञ्चित्तत्सर्वं समतां नयेत्॥

[776.] कात्यायनस्तु विशेषमाह। प्रच्छादितं तु यद्येन पुनरासाद्य तत्समं। भजेरं भ्रातृभिस्सार्धमभावें हि पितुस्सुताः॥

[777.] पितुरभावे सर्वे सुता एव तदा सादितं विभजेरन्नित्यर्थः॥

[778.] यथाह याज्ञवल्क्यः। अन्योन्यापहृतं द्रव्यं विभक्ते यत्तु दृश्यते। तत्पुनस्ते समैरंशैर्विभजेरन्निति स्थितिरिति॥

[779.] अत्र समैरिति वदता उद्धारविभागो निषिद्धः॥ विभजेरन्निति वदता येन यदृश्यते तेनैव न ग्राह्यमिति दर्शितं॥

[780.] अनेनैव वचनेन समुदितद्रव्यापहारे दायादानां न दोष इति विज्ञायत इति भारुच्यपरार्कसोमेश्वराद्य आहुः॥

Digitized by Google

[781.] विज्ञानेश्वरस्तु। ननु मनुना समुदायद्रव्यापहारे ज्येष्ठस्यैव दोषः न कनीयसां दर्शितः। यो ज्येष्ठो हि निकुर्वीत लोभाद्भातॄन्यवीयसः। सो ज्येष्ठस्स्यादभागश्च नियन्तव्यश्च राजभिरिति॥ नैतज्ज्येष्ठमात्रविषयं सर्वेषां यवीयसामपि॥ तथा च श्रुतिः। यो वै भागिनं भागान्नुदते चयते वैनं स यदि तं न चयतेऽथ पुत्रमथ पौत्रं चयत इति॥

यो भागिनं भागार्हं भागान्नुदते भागादपाकरोति भागं तस्मै न प्रयच्छति स भागान्नुन्नः एवं नेतारं चयते नाशयति दोषिणं करोति यदि तं न नाशयत्यथास्य पुत्रं पौत्रं वा नाशयतीति। ज्येष्ठविशेषमन्तरेणैव साधारणद्रव्यापहारिणो दोषः श्रुत इत्याह॥

[782.] अत्र भारुच्यादिमतमेव सम्यक्॥ मनुस्मृतिश्रुत्योर्भागमात्रप्रदानविषयत्वादवलुप्तविभागविषयत्वादिति॥

[783.] यत्तूक्तं कात्यायनेन। विभक्तेनैव यत्प्राप्तं धनं तस्यैव तद्भवेत्। हृतं नष्टं च यल्लब्धं प्रागुक्तं च पुनर्भजेत्॥

मिथोऽपहृतमित्यादिना प्रागुक्तस्योपादानं दार्ढ्यार्थं॥

[784.] तथा च दुर्विभक्तं मिथोऽपहृतमन्योन्यापहृतं

Digitized by Google

नष्टं दुर्लब्धं च समतां नयेदित्यर्थः ॥ अन्योन्यापहृतं द्रव्यं दुर्विभक्तं च यद्भवेत्। पश्चात्प्राप्तं विभज्येत समभागेन तद्भृगुरिति ॥

दुर्विभक्तं शास्त्रोक्तप्रकारमन्तरेण विषमतया विभक्तं ॥

नष्टं तु निक्षेपादिना नष्टं पश्चाल्लब्धं ॥

दुर्लभं त्वसाध्यजनस्थितऋणादिकं ॥

[785.] एवमन्यापहृतदुर्विभक्तनष्टमिथो ऽपहृतदुर्लब्धानां विभागानन्तरं ज्ञायमानानां भ्रातृभिस्समांशेनैव विभागः कर्तव्य इति शास्त्रमर्यादा ॥

## [विभागसन्देहनिर्णयः]

[786.] अथ विभागसन्देहनिर्णयप्रकारमाह नारदः। साक्षित्वं प्रातिभाव्यं च दानं ग्रहणमेव च। विभक्ता भ्रातरः कुर्युर्नाविभक्ताः परस्परं ॥

[787.] बृहस्पतिः। पृथगायव्ययधनाः कुसीदं च परस्परं। वणिक्पथं च ये कुर्युर्विभक्तास्ते न संशय इति ॥

[788.] विष्णुरपि। क्रयविक्रयदानग्रहणप्रातिभाव्यसाक्षित्वसंभूयकारित्वनिध्याधानादिकं परस्परकृतं विभागहेतुरिति ॥

Digitized by Google

[789.] अयं क्रयविक्रयाधिकारहेतुः ॥ अतश्च साक्षित्वप्रातिभाव्यदानग्रहणादीनि परस्परमेव न कार्याणि ॥ भ्रातॄणां मध्य इतराभ्यनुज्ञया एकस्यैव विभक्तपितृव्यादिकं प्रतिप्रातिभाव्यादेर्विहितत्वात् ॥

[790.] तथा च स्मृतिः । इतरेणानुज्ञानातः प्रातिभाव्यं वहेत्पर इति ॥

[791.] अनेनैवाभिप्रायेणाह याज्ञवल्क्यः । भ्रातॄणामथ दंपत्योः पितुः पुत्रस्य चैव हि । प्रातिभाव्यमृणं साक्ष्यमविभक्तेन तु स्मृतमिति ॥

परस्परमिति शेषः ॥

[792.] अत एवाह स एव । विभागनिह्नवे ज्ञातिबन्धुसाक्ष्यभिलेख्यकैः । विभागभावना ज्ञेया गृहक्षेत्रैश्च यौतकैः ॥

[793.] विभागस्य निह्नव अपलापे ॥

ज्ञातिभिः पितृबन्धुभिः विभक्तपितृव्यादिभिः ॥

बन्धुभिर्मातृबन्धुभिर्मातुलादिभिः ॥

साक्षिभिः पूर्वोक्तलक्षणैः ॥

लेख्येन विभागपत्रेण ॥

विभागभावना विभागनिर्णयो ज्ञातव्यः ॥

तथा यौतकैः पृथक्कृतैः गृहक्षेत्रैश्च ॥

Digitized by Google

नष्टं दुर्लब्धं च समतां नयेदित्यर्थः ॥ अन्योन्यापहृतं द्रव्यं दुर्विभक्तं च यद्भवेत् । पश्चात्प्राप्तं विभज्येत समभागेन तद्भृगुरिति ॥

दुर्विभक्तं शास्त्रोक्तप्रकारमन्तरेण विषमतया विभक्तं ॥

नष्टं तु निक्षेपादिना नष्टं पश्चाल्लब्धं ॥

दुर्लभं त्वसाध्यजनस्थितऋणादिकं ॥

[785.] एवमन्यापहृतदुर्विभक्तनष्टमिथोऽपहृतदुर्लब्धानां विभागानन्तरं ज्ञायमानानां भ्रातृभिस्समांशेनैव विभागः कर्तव्य इति शास्त्रमर्यादा ॥

## [विभागसन्देहनिर्णयः]

[786.] अथ विभागसन्देहनिर्णयप्रकारमाह नारदः । साक्षित्वं प्रातिभाव्यं च दानं ग्रहणमेव च । विभक्ता भ्रातरः कुर्युर्नाविभक्ताः परस्परं ॥

[787.] बृहस्पतिः । पृथगायव्ययधनाः कुसीदं च परस्परं । वणिक्पथं च ये कुर्युर्विभक्तास्ते न संशय इति ॥

[788.] विष्णुरपि । क्रयविक्रयदानग्रहणप्रातिभाव्यसाक्षित्वसंभूयकारित्वनिध्याधानादिकं परस्परकृतं विभागहेतुरिति ॥

Digitized by Google

[789.] अयं क्रयविक्रयाधिकारहेतुः ॥ अतश्च साक्षित्वप्रातिभाव्यदानग्रहणादीनि परस्परमेव न कार्याणि ॥ भ्रातॄणां मध्य इतराभ्यनज्ञया एकस्यैव विभक्तपितृव्यादिकं प्रतिप्रातिभाव्यादेर्विहितत्वात् ॥

[790.] तथा च स्मृतिः । इतरेणानुज्ञानानः प्रातिभाव्यं वहेत्पर इति ॥

[791.] अनेनैवाभिप्रायेणाह याज्ञवल्क्यः । भ्रातॄणामथ दंपत्योः पितुः पुत्रस्य चैव हि । प्रातिभाव्यमृणं साक्ष्यमविभक्तेन तु स्मृतमिति ॥

परस्परमिति शेषः ॥

[792.] अत एवाह स एव । विभागनिह्नवे ज्ञातिबन्धुसाक्ष्यभिलेख्यकैः । विभागभावना ज्ञेया गृहक्षेत्रैश्च यौतकैः ॥

[793.] विभागस्य निह्नव अपलापे ॥

ज्ञातिभिः पितृबन्धुभिः विभक्तपितृव्यादिभिः ॥

बन्धुभिर्मातृबन्धुभिर्मातुलादिभिः ॥

साक्षिभिः पूर्वोक्तलक्षणैः ॥

लेख्येन विभागपत्रेण ॥

विभागभावना विभागनिर्णयो ज्ञातव्यः ॥

तथा यौतकैः पृथक्कृतैः गृहक्षेत्रैश्च ॥

Digitized by Google

चकारेण पृथक्पृथक्कृष्यादिकार्यप्रवर्तनं पृथक्पृथक्पञ्चमहायज्ञादिधर्मानुष्ठानं समुच्चीयते ॥

[794.] तथा च नारदः। विभागधर्मसन्देहे दायादानां विनिर्णयः। ज्ञातिभिर्भागलेख्येन पृथक्कार्यप्रवर्तनादिति ॥

[795.] अत्र लिखितसाक्ष्यादेर्ज्ञापकहेतुत्वं विभागसन्देहे सिद्धस्यैव विभागस्य ज्ञापकत्वात् ॥ कारकहेतूनां त्वविद्यमानस्यापि विभागस्य निष्पादकत्वं पुरस्तान्निवेदयिष्यते ॥ गृहक्षेत्रैश्च यौतकैरिति चकारसमुच्चितास्तु दशवर्षपर्यन्तावस्थिताः कारका इति च पुरस्तान्निवेदयिष्यते ॥

## [लिंगगमकत्वं]

[796.] नन्वस्मिं वचनद्वये लेख्यसाक्षिभ्यां तुल्यतया लिंगानां गमकत्वमुक्तं। तन्न संगच्छते। लिंगानां तर्करूपेण प्रमाणानुग्राहकतया तद्वत्प्रमापकत्वायोगादिति चेत्।

[797.] मैवं। अस्मिं विवादपदे लिंगानामपि प्रमापकत्वमेव न त्वितरसप्तदशविवादपदेष्विव लिंगानां प्रमाणानुग्राहकत्वं ॥

[798.] तथा हि। विभागार्हेषु भ्रातृषु परस्परं

Digitized by Google

ऋणप्रातिभाव्यसाक्ष्यदानप्रतिग्रहपितृदेवार्चनादिकाः क्रियाः होढादर्शन उल्काहस्तादिलिंगतुल्या न भवन्ति ॥ यतश्चैतानि नाविभक्ताः कथञ्चनेत्यादि स्मृतिवशादविभक्तानां निषिद्धानि विभागमवगमयन्तीत्यभिसन्धाय । विभागनिह्नव इत्यादि वचने साक्षिलिखितसमानयोगक्षेमतया लिंगान्युक्तानि ॥ इतरेषु विवादपदेषु लिखितसाक्ष्यादीनामेव प्रमापकत्वात् । इतरेषां तदनुग्राहकत्वं । अत्र तु न तथेति ॥ किञ्चानेनैव वचनेन ज्ञायते । अस्मिं विषये लिंगानामपि लेख्यसाक्षिभ्यामन्तरेणापि प्रमापकत्वमभ्युपगतमिति ॥

[799.] अत एव बृहस्पतिः । साहसं स्थावरस्वाम्यं प्राग्विभागश्च रिक्थिनां । अनुमानेन विज्ञेयं न स्युर्यत्र च साक्षिण इति ॥

[800.] न स्युरिति लिखितसाक्षिणावन्तरेणेत्यर्थः॥ साक्षिग्रहणं प्रबलप्रमाणस्योपलक्षणं ॥ अत एव लेख्यमपि संगृहीतं ॥

[801.] अत एवानन्तरमुक्तं तेनैव । तेषामेताः क्रिया लोके प्रवर्तन्ते स्वरिक्थिषु । विभक्तानवगच्छेयुर्लेख्यमप्यन्तरेणतान् ॥

लेख्यग्रहणं साक्षिणामप्युपलक्षणं ॥

Digitized by Google

[802.] केचिदाहुः। अत्र विभागनिह्नवे लिखितसाक्षिभ्यां तुल्यबलत्वं लिंगानामप्यवगन्तव्यं॥ अत एवाहैतद्याख्याने चन्द्रिकाकारः। प्रवर्तन्ते व्यस्तास्समस्ता इति शेष इति॥ तन्न। परस्परकर्तृकसाक्षित्वप्रातिभाव्यादीनां ज्ञापकहेतुभ्यो विलक्षणत्वेनोक्तत्वात्॥

[803.] साक्षिग्रहणेनैव ज्ञात्यादीनां तटस्थसाक्षिणामपि साक्षित्वे ऽपि विभागनिर्णये तेषां प्राबल्यज्ञापकार्थं पृथग्ग्रहणमिति विज्ञानेशः॥

[804.] साक्षिग्रहणं कृतसाक्षिपरमिति केचित्॥

[805.] बृहस्पतिः। एकपाकेन वसतां पितृदेवद्विजार्चनं। एकं भवेद्विभक्तानां तदेव स्याद्गृहे गृहे॥

[806.] एवं च पृथक्पृथग्वैश्वदेवादिकार्यप्रवर्तनमविभक्तेष्वविद्यमानं विभक्तत्वमवगमयतीति विभागसन्देहे निर्णययुक्तिर्युक्तेत्यनवद्यमिति चन्द्रिकाकारः॥

[807.] अस्यायमाशयः। पितृदेवद्विजार्चनमित्यत्र पितृशब्देन प्रत्याब्दिकमुच्यते। अमावास्यादिश्राद्धानामविभक्तानां मध्य इतराभ्यनुज्ञया इतरस्याधिकारात्॥ अत्र देवशब्देन तत्सन्नियोगशिष्टं वैश्वदेवश्राद्धमुच्यते। न तु देवयज्ञादिकं। तस्याविभक्ता-

Digitized by Google

नामपि विहितत्वात् । अविभक्तैश्च कर्तव्या वैश्वदेवा-दिकाः क्रिया इति स्मरणात् ॥

[808.] तच्च वैवाहिकाग्निर्येषां मत अलौकिकः । लौकिकत्वपक्षे तु विभागानन्तरमेवाग्निहोत्रवैश्वदे-वादिकाः कार्या इति तेषां कारकहेतवो वैश्वदेवा-दिकाः । उभयेषां प्रत्याब्दिकं कारकहेतुः ॥

[809.] अत्र केचिदेवमाहुः । चन्द्रिकाकारेण श्रेष्ठनिर्णयप्रमाणाभावे लिंगानां प्रवेश इत्युक्तं । तत्तु लिखितसाक्षिसद्भावे ताभ्यां निर्णय औत्सर्गिक इति तेषां प्राधान्यमुक्तं । न तु प्रमापकत्वे ॥ लिखि-तसाक्षिलिंगानां विभागनिह्नवस्थले लिंगादितर-प्राबल्यस्य स्मृत्याचारयोर्वेदानुमापकत्वे तुल्य आचा-रमूलकवेदानुमानात्स्मृतिमूलवेदानुमानस्य सुकरत्व-वदित्यनुसन्धेयमिति ॥

[810.] तन्न । चन्द्रिकाकारस्य लिंगशब्देन हेतुर-भिप्रेतः । स च ज्ञापक एव । कारकहेतूनां लिखिता-द्यतिशयित्वान्न तुल्यतेति ॥

## [दशवर्षपृथग्धर्मक्रियाणां गमकत्वं]

[811.] अत्र कात्यायनः । वसेयुर्दशवर्षाणि पृथ-

ग्धर्माः पृथक्क्रियाः । भ्रातरस्ते ऽपि विज्ञेया विभक्ताः पैतृकाद्धनादिति ॥

[812.] भ्रातृशब्दो ऽत्र रिक्थसंबन्ध्युपलक्षणार्थः । पैतृकग्रहणं दायधनोपलक्षणार्थमिति चन्द्रिकाकारः॥

[813.] तन्न । स्वत्वानुत्पत्तेरिति वक्ष्यते ॥

[814.] ननु कार्यानुषंगाद्वाशक्त्या वा दशवर्षपर्यन्तं दायग्रहणाभावे व्यवहारसिद्ध एवेति पूर्वप्रकरणोक्तं विरुध्येदिति चेत् ।

[815.] मैवं । परमार्थतो दायग्रहणाभावे ऽपि । पश्यतो ब्रुवतो भूमेर्हानिर्विंशतिवार्षिकी । परेण भुज्यमानाया धनस्य दशवार्षिकी इतिवच्छलानुसारेण विभक्ता एवेति चन्द्रिकाकारः ॥

[816.] अत्र छलं स्वोपेक्षानिबन्धनं ॥

[817.] नन्वेवं पश्यतो ब्रुवतो भूमेरित्यत्र न व्यवहारहानिर्न स्वरूपहानिः । अपि तु फलहानिरित्युक्तं विज्ञानयोगिना तद्वदत्रापि फलहानिरेव न स्वरूपहानिर्न व्यवहारहानिरिति चेत् ।

[818.] मैवं । भूमेर्हानिरित्यत्र कर्मणि षष्ठीविधानाद्विंशतिवार्षिको भोगो भूमिं हन्यादिति वाक्यार्थस्य निष्पन्नत्वात् । दशवार्षिको भोगो धनं हन्यादिति स्वरूपहानिरेवोक्ता ॥

Digitized by Google

[819.] ननु छलं निरस्य भूतेन व्यवहारान्नयेन्नृप इति तत्त्वानुसरणेनैव न्यायः कर्तव्य इति चेत्।

[820.] मैवं। अत्र छलमतत्त्वात्मकं विवक्षितं न तु तत्त्वात्मकं। तत्त्वात्मकछलावलम्बनेन तु व्यवहारनिर्णयदर्शनात्॥

[821.] तथा हि। भूतच्छलानुरोधेन द्विगतिस्समुदाहृत इति व्यवहारस्य छलावलम्बनमप्येका गतिरुक्ता। अन्यथा धर्मश्च व्यवहारश्च चरित्रं राजशासनं। चतुष्पाद्व्यवहारो ऽयं उत्तरं पूर्वबाधकमिति स्मृत्या उत्तरेषां व्यवहारचरित्रराजशासनानां धर्मबाधकत्वं छलानुसरणनिबन्धनं विरुध्यात्॥ एतस्य छलानुसरणस्यातात्त्विकत्वे स्मृतिकाराणामप्रामाणिकत्वं स्यात्॥

[822.] अत एव छलं निरस्य भूतेनेत्यत्र छलग्रहणमतत्त्वात्मकछलविषयमिति मन्तव्यं॥

[823.] अत एव चन्द्रिकाकारविज्ञानयोगिभ्यां निह्नवे भावितो दद्यादेकदेशविभावित इति वचनव्याख्यानावसरे छलानुसरणमत्र कार्यमित्युक्तं॥

[824.] विज्ञानयोगिनापि। स्थावरेषु विवादेषु दिव्यानि परिवर्जयेदित्यत्रावष्टंभविषये दिव्यं नास्तीति वदता पश्यतो ब्रुवतो भूमेरित्यत्रापि तु फलहा-

Digitized by Google

निरिति वदता छलानुसारेण निर्णयो ऽंगीकृत इति दिङ्मात्रमुदाहृतं ॥

[825.] तत्र केचिदाहुः। दशवर्षपर्यन्तं पृथक्क्रियाकरणं पृथग्धर्माचरणं च रिक्थक्रयसंविभागपरिग्रहाद्यन्यतमत्वाभावात्स्वत्वहेतुत्वाभावात्। पृथक्क्रियस्य पृथग्धर्मस्य पुरुषस्य कथं स्वत्वापादकमिति चेत्। उच्यते॥ विभक्ताः पैतृकाद्धनादिति वचनादवगम्यते स्वत्वं॥

[826.] तथा हि। विभागो नाम समुदायद्रव्यविषयाणामनेकस्वाम्यानामेकैकत्रावस्थापनमित्युक्तं प्राक्॥ तच्च वचनादवगम्यते॥ यथा। आधिः प्रणश्येद्द्विगुणे धने यदि न मोक्ष्यत इत्यत्र वाचनिकी स्वत्वनिवृत्तिः परस्वापत्तिरित्युक्तं विज्ञानयोगिना॥

[827.] चन्द्रिकाकारेणापि छलानुसारेण विभागो ऽस्तीति वदता वाचनिकी स्वत्वापत्तिरिति वक्तव्यं॥

[828.] नन्वेवं चन्द्रिकाकारेणाधिः प्रणश्येदित्यत्र तिलविनिमयादिदृष्टान्तेनाधेर्विनिमयान्तत्वमंगीकृत्य तस्य विनिमयस्य स्वत्वहेतुता लोकसिद्धेत्युक्तमिति एवमत्रापि लोकसिद्धाश्रयेण प्रकारान्तरेणौदासीन्यस्वोपेक्षानिबन्धनस्वीकारो ऽपि स्वत्वहेतुर्भ-

Digitized by Google

वत्विति वाच्यं । पश्यतो ब्रुवतो भूमेरित्यनेनैव दत्तो-त्तरत्वात् ॥

[829.] किञ्च तत्रापि चन्द्रिकाकारस्य वाचनिकदानान्तत्वं विनिमयद्रव्यस्य क्रयमूल्यतया क्रयान्तत्वं स्वीकर्तव्यमित्युक्तं प्राक् ॥

[830.] स्वत्वस्य वाचनिकत्वं नाम पारिभाषिकमित्युक्तमाधिः प्रणश्येदित्यादि वचनव्याख्यानावसरे । तच्च पारिभाषिकत्वमत्र वक्तुं न शक्यते । दशवर्षपर्यन्तं तूष्णीमेवावस्थितत्वात् ॥

[831.] परमार्थतोऽपि दायग्रहणाभाव इति चन्द्रिकाग्रन्थस्यायमर्थः । परमार्थतो वस्तुवृत्त्या । दायग्रहणं विभागः । तस्याभावेऽपि पैतृकाङ्कनाङ्कान्तरो विभक्ता एवेति ॥

[832.] अयमाशयः । यथेष्टविनियोगार्हत्वमेव स्वत्वं । तच्च जन्मनैव सिद्धं ॥

[833.] कारकहेतूनां परस्परकर्तृकसाक्षित्वप्रातिभाव्यदानग्रहणक्रयविक्रयसंभूयकारित्वनिध्यादानादीनां सद्भावे सद्य एव विभागोत्पत्तिः । तेषां कारकत्वेनैव ज्ञापकत्वाभ्युपगमात् ॥ विभक्ता भ्रातरः कुर्युर्नाविभक्ताः परस्परमित्यविभक्तानां निषिद्धास्सन्तो विभागं निष्पाद्य ज्ञापयन्ति ॥ यथा द्वैतीयकसाध्या-

Digitized by Google

नुबन्धाः शास्त्रभेदं निष्पाद्य तत्सद्ज्ञापका इति कार-
कहेतुत्वेनाभिमता मीमांसकैः तद्वदत्रापीति मन्तव्यं ॥

[834.] अथ जन्मनैव स्वत्वमुत्पन्नं भ्रातॄणां ।
तथापि विभागकारकहेत्वभावाद्दशवर्षपर्यन्तमवष्टंभ-
हेतूनां विभागकारकत्वे सिद्धे स्वत्वस्यापि विभागस्सि-
द्धसंस्फुरतीति चन्द्रिकाकारस्याभिमतयोग्यं मतम-
नूदितं ॥

[835.] अतश्च तेषां लिंगानां सद्भावे संविभागो
वश्यमस्तीत्यपि शब्दं प्रयुञ्जानस्य भाव इति ॥

[836.] यत्तु चन्द्रिकाकारेणोक्तं दशवर्षादर्वागित्या-
दिना ग्रन्थकलापेन । विभागसन्देहे दिव्यानवता-
रात्पुनर्विभागः कर्तव्य इति लिंगानां सामर्थ्यमसा-
मर्थ्यं चोक्तं तत्तु दशवर्षादर्वागपि लिंगानां साक्षि-
लिखितप्रमाणाभ्यां सामर्थ्यं तुल्यमेव किन्तु दशवर्ष-
स्योपरि लिंगानां प्राबल्याल्लिखितसाक्षिसद्भावे ऽपि
तदपेक्षानास्तीत्येवं परं ॥

[837.] दिव्यानवतारस्तु वाचनिकः । सर्वाभावे
ऽपि पुनर्विभागः कर्तव्य इति विष्णुस्मरणात् ॥

[838.] सर्वेषां लिखितादिज्ञापकहेतूनां कारक-
हेतूनां चाभावे विभागशब्दः पत्नीविभागवदसमर्थेषु

Digitized by Google

भ्रातृषु दरिद्रेषु च स्वरुच्या यत्किंचिद्दातव्यमित्येवं परः इति सोमेश्वरादय आहुः ॥

[839.] तन्न । सर्वाभावे दिव्यानवतारात्स्वरुचिपक्षस्यानवताराच्छुद्ध एव विभागः कर्तव्य इत्याह भारुचिः ॥

[840.] अयमेव पक्षस्सम्यक् ॥

[841.] केचित्तु सोमेश्वरादीनामभिसन्धिमेवमाहुः । व्यपगते विभागसन्देहे विभागस्य सिद्धत्वे ऽपि भ्रातरः पोष्या इति यत्किंचिद्देयमित्याहुरिति सर्वमनवद्यं ॥

[842.] एतच्चन्द्रिकाकाराभिमतियोग्यं मतमनूदितं ॥

[843.] वसेयुर्दशवर्षाणि पृथग्धर्माः पृथक्क्रियाः । विभक्ता भ्रातरस्ते ऽपि विज्ञेयाः पैतृकाङ्कनादित्यनेन द्रव्याभाव अत्यन्तनिस्वानां धर्मविभागः कर्तव्यः । विभागे धर्मवृद्धिस्स्यादित्यादि स्मृतिभ्यः ॥

[844.] अतश्च पितृद्रव्यविरोधेन दशवर्षपर्यन्तं ये पृथग्धर्माः पृथक्क्रियाः विभक्ता एव । धर्मविभागस्य इतराभ्यनुज्ञामन्तरेणापि एकेनैव स्वीकर्तुं शक्यत्वादित्युक्तं भारुचिना ॥

[845.] एतादृशस्य विभागशब्दवाच्यत्वमप्यस्तीत्युक्तं प्रकरणादावेव ॥ पितृद्रव्याविरोधेनार्जिते द्रव्ये दा-

Digitized by Google

यादानामनधिकार इत्युक्तं ॥ अतश्च पितृद्रव्याविरोधेनार्जितद्रव्यस्य सद्भावे ऽपि तस्याविभाज्यत्वाद्धर्मविभागात्मक एवात्र विभागो ऽवतिष्ठत इत्यवगन्तव्यं ॥ पैतृकाद्धनादिति ल्यब्लोपे पञ्चमीति ॥

[846.] अत्रेदं भारुचेमेंतत्त्वं । वसेयुर्दशवर्षाणीत्यत्र ल्यब्लोपे पञ्चम्याश्रयणात्पितृधनं विहायये दशवर्षपर्यन्तं धर्मविभागवन्तः तेषां तदूर्ध्वं मैत्रादिना यल्लब्धं तदेवाविभाज्यं। दशवर्षमध्ये लब्धं मैत्रादिकं विभाज्यमेव ॥ अविभागदशायां स्वयमर्जितं मैत्रादिकं विभाज्यमिति कैमुतिकन्यायसिद्धं ॥

[847.] यथाह विष्णुः । अपित्र्यं गार्भं धार्मं मैत्रं वैद्यमाकस्मिकमादशाब्दं प्रविभाज्यमत ऊर्ध्वं सर्वमविभाज्यमिति ॥

[848.] अत्राह भारुचिः । अपित्र्यमविद्यमानपितृद्रव्यव्ययं। एतत्त्रितयविशेषणं॥ गार्भं स्त्रीधनं। धार्ममिष्टापूर्तादिकं। मैत्रं मित्रसकाशाल्लब्धं। वैद्यं विद्यातो लब्धं। आकस्मिकमकस्माल्लब्धं। निध्यादिकं। प्रतिग्रहादिना लब्धं॥ एतत्पञ्चविधद्रव्यमध्य उत्तरत्रयं धर्मविभागाभाव अविभक्तत्वाद्विभाज्यं। दशवर्षपर्यन्तावस्थितिरूपधर्मविभागसद्भावे ऽप्यविभाज्यमेवेति ॥

[849.] अयमाशयः । आदशवर्षमिति धर्मविभागोपलक्षणमिति ॥

[850.] न चैतद्वचनं । सन्धिश्च परिवृत्तिश्च विभागश्च समा अपि । आदशाहान्निवर्तन्ते विषमान्नववत्सरादिति विषमविभागस्य नववर्षपर्यन्तं निवृत्तिप्रतिपादकभरद्वाजवचनानुसारेण नववर्षादुपरि विषमविभागो न परावर्तेत इत्येवं परमिति वाच्यं। एतद्वचनस्य तत्परत्वाभावात् ॥

[851.] तथा हि । एतद्वचनं विभागसन्देहं प्रक्रम्योक्तं । वचनसामर्थ्यं चापि तथैव प्रतिभाति ॥ वसेयुर्दशवर्षाणि पृथग्धर्माः पृथक्क्रियाः । विभक्ता भ्रातर इति पृथग्धर्मकत्वपृथक्क्रियत्वलक्षणविशेषणविशिष्टादशवर्षपर्यन्तं वसतिर्विभागहेतुः प्रतिपादितः । विषमविभागप्रतिपादनपरत्वे व्याहन्येत । विभक्ता भ्रातर इति लिंगसामर्थ्यैर्लिंगो विभागो व्याहन्येत । विभागलिंगानां परस्वत्वापादकत्वाभावात् ॥ छलानुसारेणापि व्यवहारस्य न्यायत्वादिति तत्र ल्यब्लोपे पञ्चम्येव समाश्रयणीयेति ॥

[852.] तन्न । विभागलिंगानां कारकरूपहेतुत्वाद्विभागोत्पादने सामर्थ्यस्योक्तेः । स्वत्वस्यापि पुत्राणां



Digitized by Google

जन्मनैव सिद्धत्वात् । तत्स्वात्मकछलानुसरणस्य न्याय्यत्वेनोदाहृतत्वात् ॥

[853.] तदयमत्र निष्कर्षः । विभागसन्देहे क्वचिल्लिखितेन निर्णयः । क्वचित्साक्षिभिः । क्वचिज्ज्ञातिभिः । क्वचिद्बन्धुभिः । क्वचिन्मिश्रितैर्निर्णयः कर्तव्यः ॥ एतेषामभावे कारकहेतुभिर्निर्णयः ॥ उभयसद्भावे कारकहेतुरौत्सर्गिक एव ॥ ज्ञापकहेतुभिस्तु दशवर्षपर्यन्तं प्रवर्तितैरेव निर्णयो नान्यैः ॥ दशवर्षपर्यन्तावस्थितानां ज्ञापकहेतूनां कारकत्वात्मनावस्थितेः कारकहेतुभिरेव निर्णय इत्यर्थादुक्तं ॥ इयांस्तु विशेषः । स्वभावतः कारकहेतुभिः सद्य एव विभागसिद्धेस्तन्निर्णयः । ज्ञापकहेतुरूपकारकाणां दशवर्षान्त इति ॥ सर्वाभावे दिव्यानवताराच्छुद्धो विभागः कर्तव्यः ॥ उक्तहेतुभिर्विभागसिद्धावपि व्यवहर्तृभ्रातृभ्यो यत्किंचिद्देयमिति सर्वमनवद्यं ॥

[854.] इति प्रतापरुद्रदेवमहाराजविरचिते स्मृतिसंग्रहे सरस्वतीविलासे व्यवहारकाण्डे दायविभागाख्यस्य पदस्य विलासः ॥

Ex. J. M.

Digitized by Google